Tanjore Sarasvati Mahal Series No. 171.

Shaddarsani Sidhanta Sangraha

By

(Sri Ramabhadra Dikshita and Others)

Tanjore Maharaja Serfoji's
Sarasvati Mahal Library, Thanjavur.

*

1980.] [Price: Rs. RS: 18/-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. SarasvatiTMahal Series. Digitized by Sri Muthulakshmi Research Academy

Tanjore Sarasvati Mahal Series No. 171.

Shaddarsani Sidhanta Sangraha

By

(Sri RAMABHADRA DIKSHITA and OTHERS)

(TARKA, MIMAMSA, SANKHYA, YOGA,
VEDANTA and VYAKARANA)

*

Edited with introduction in Sanskrit and Tamil

By

P. M. Padmanabha Sarma, Siromani,
Vedanta Visarada & Hindi Praveen Pracharak,
Sanskrit Pandit,
Sarasvati Mahal Library, Thanjavur.

*

Published by

ADMINISTRATIVE COMMITTEE OF
The Tanjore Maharaja Serfoji's Sarasvati Mahal Library,
Thanjavur.

*

Printed at

Sarasvati Mahal Library Press, Thanjavur.

Price Rs. 4—00. [A. D. 1980.

0171

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Sarasvati Mahal Library. Thanjavur

CC-0. SarasvatiMahal Series. Digitized by Sri Muthulakshmi Research Academy

तंजापुरी सरस्वतीमहालय ग्रन्थमालायाः पुष्पम् १७१.

॥ षड्दर्शनीसिद्धान्तसङ्ग्रहः ॥

[श्रीरामभद्रदीक्षितादिभिः सङ्गृहीतः]

[तर्क, मीमांसा, सांख्य, योग, वेदान्त, व्याकरणानाम्]

सरस्वतीमहालय संस्कृतपण्डितेन

वेदान्तविशारद - वेदान्त शिरोमणि - हिन्दी प्रवीण - प्रचारक बिरुदभाजा

पु. म. पद्मनाभशर्मणा

संशोध्य, संस्कृतद्राविडीप्रस्तावनासहितं परिष्कृत्य,

सम्पादितः ।

तंजापुरी सरस्वतीमहाल् ग्रन्थालय निर्वाहकसमित्या

भारत सर्वकार धनसाहाय्येन प्रकाशितः

विजयतेतमाम् ।

[मूल्यम् रु. ४-००.] [क्रैस्तवाब्दाः १९८०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Shaddarsini Siddhanta Sangraha

PREFACE

India is a birth place of many schools of philosophy and religion. So, the great seers and thinkers of India have contributed their best for the development of philosophy and religion in all their facets.

The book on hand is a lucid compendium of the six schools of Indian Philosophy. It is stated in the book itself that at the behest of the King Shahaji the scholors of his court have compiled this work. This work is very useful for the scholars and laymen as well to know about the six schools of Indian Philosophy namely, Nyaya (Gautama School of Indian Logic), Vaiseshika (Kanada school of Indian Logic), Mimamsa (Bhatta and Prabhakara Schools of the Philosophy of Sacrifices), Sankhya (Kapila School of the Philosophy of the creation of the world), Yoga (Patanjali School of the Philosophy of Meditation) and Vedanta (Badarayana School of the Philosophy of the Knowledge of the Self). Vyakarana (Paniniyan system of Sanskrit Grammar) also finds a place here.

Thiru P. M. Padmanabha Sarma, Siromani, Sanskrit Pandit of the Tanjore Maharaja Serfoji's Sarasvati Mahal Library, has sincerely edited this work in a good manner. We are thankful to him for his sincere endeavour.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

We are very greatful to the Government of India for providing the Library with the Grant to publish this useful work.

Our thanks are due to the entire staff of the Library for their co-operation in publishing this work.

The Library Press has printed the Work neatly and has given a good getup and so it deserves our praise.

Thanjavur,
26—5—80.

D. SUNDARESAN, I. A. S.,
Collector and Chairman
T. M. S. S. M. Library Committee,
Thanjavur.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

षड्दर्शनीसिद्धान्तसङ्ग्रहस्थविषयसूचिका

S. No.	Name of the Sidhanta.		Page No.
	प्रस्तावना सङ्ग्रहश्लोकश्च	....	1— 3
1.	तर्के	नैयायिकसिद्धान्तः	3—16
		वैशेषिकसिद्धान्तः	17
2.	मीमांसायां	भाट्टमतसिद्धान्तः	18—24
		प्राभाकरमतसिद्धान्तः	25—29
3.	सांख्यमतसिद्धान्तः	....	30—33
4.	योगमतसिद्धान्तः	....	34—38
5.	वेदान्ते	विशिष्टतयाऽद्वैतमतसंग्रहः	39—42
		सामान्यमतसग्रहः	43—48
6.	व्याकरणसिद्धान्तः	... .	49—56

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

सरामश्शाहजीन्द्रेण स्थापितान्शाहजीपुरे ।
सर्वतन्त्रस्वतन्त्रांस्तान् रामभद्रादिदीक्षितान् ॥

प्रियमहाशयाः

भूमण्डलमण्डनायमानपण्डितप्रकाण्डानां स्मारणाय वा, तत्तच्छास्त्राध्ययनं कृत्वा शास्त्रान्तरेषु तुलनां कर्तुमपारयन्तः ये, तेषामुपकाराय वा, तत्तच्छास्त्राध्ययनं चिकीर्षतां विद्यार्थिनां प्रवेशाय वा, एवं सर्वेषामपि महाजनानामुपकाराय कल्पेतेति श्रीमद्भिः पण्डिततल्लजैः संगृहीतः "षड्दर्शनी सिद्धान्तसङ्ग्रहो" नाम नूत्नः ग्रन्थविशेषः भवतां करकमलयोरुपहारीक्रियते

कैः केन कदा सङ्गृहीतः ?

विदितमेवेदमितिहासप्रज्ञावतां संख्यावतां जनानां यत् तञ्जपुरीयं चोलानन्तरं नायकवंशीयैर्भूनायकैः, पश्चात् भोसलकुलजन्यैराजन्यमूर्धन्यैः शासिता, अस्यां च श्रीशरभोजिमहाराजः लौकिकराज्यं परित्यज्यालौकिकं राज्यं परिपालयितुकामेनेव महदल कोशागारं स्थापयामास । तन्नाम्नैव "तंजावूर् शरभोजि महाराज सरस्वतीमहाल कोशागारमि"ति ग्रन्थालयोऽयं सङ्कीर्त्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्तादृशभोंसलवंशीयेषु राजसु १६८४–१७१० पर्यन्ते समये तञ्जपुरीसिंहासनमधिरूढवान् शाहजीमहाराजः। तस्य समये चोलभूरियं स्वर्णभूरिव व्यराजत। वसुन्धरा च यथार्थनाम्नी व्यलसत्। स च राजा स्वयं कविः, पण्डितः, सङ्गीतकलाविचक्षणः बहुभाषाप्रवीणश्चासीत्। अत एव षड्दर्शनपारङ्गतान्पण्डितान्मानयामास, शाहजीपुरं, एकोजीपुरं, दीपाम्बापुरमिति प्रसिद्धान्ग्रामानपि पण्डितसादकरोत्, कनकाभिषेकादिभिश्च तान्संपूज्य स्वकुटुम्बभरणेऽपि निश्चिन्तान्कारयामास। काव्यनाटकेतिहासपुराणादीनां चर्चया, वेदवेदाङ्गानामध्ययनेन, न्यायवैशेषिकमीमांसावेदान्तादीनां प्रचारेण, तत्तच्छास्त्रेषु ललितललितानां ग्रन्थानां निर्माणेन, इत्येवं चोलभूप्रदेशं सारस्वतनदीमातृकं यथा ते कुर्युः, तादृशं प्रबन्धं चाकरोत्।

तस्य च समये चोलदेशक्षेत्रेषु न केवलं धान्यादिकमुप्तम्, परन्तु तत्र तत्र विद्यार्थिक्षेत्रेषु काव्यनाटकादिसाहित्यबीजमप्युप्तम्। तत्र न केवलं सस्याङ्कुराः प्ररोपिताः, किन्तु तर्कमीमांसादिशास्त्राङ्कुरा अपि प्ररोपिताः। जनतायां न केवलं धान्यजातमासादितम् अपि तु वेदवेदान्तादिधान्यजातमपि आसादितम्। न केवलं सर्वेषामपि जनानां रसालकदल्यादिफलमेव हस्तगतमासीत्, परन्तु वेदान्तप्रचारेण मोक्षफलमपि हस्तगतमभूत्। किं बहुना, तदानीं यत्र यत्र कावेरी प्रावहत् तत्र तत्र बहवः कवयः पण्डिताः शास्त्रनिष्णाताः सन्यासिनः इति ज्ञानखनयः खाता व्यराजन्त।

तासु च खनिषु खन्यमानासु जगतः जनतायाश्च भागधेयेन श्रीरामभद्रदीक्षितः, रामनाथमखीश्वरः, नरहरिदीक्षितः, वेङ्कटेशदीक्षितः, यज्ञेश्वरदीक्षितः, पेरियप्पादीक्षितः, श्रीनिवासार्यः इत्येवमादयः मणयः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

परमशिवेन्द्रः, सदाशिवब्रह्म, कृष्णानन्दसरस्वतीश्रीपादः, रामानन्दयतिः इत्येवमादयः परमहंसपरिव्राजकाचार्या अपि रत्नमणय इव प्राप्ताः। पूर्वोक्तास्सर्वेऽपि स्वैः स्वैः परश्शतैः ग्रन्थजातैः साहितीवेणीलतिकां बहुभिः निर्यत्ननिर्यन्मधुभिः माधवैः कुसुमैरिव वासनावासितामकुर्वन्।

इत्थं काव्यनाटकादिसाहित्यनिचयस्य, वेदवेदाङ्गादिवैदिकसाहित्यस्य, तर्कमीमांसादिदर्शननिवहस्य, गीतादिकलाकलापस्य सर्वस्याप्युन्नतेः कारणं श्रीशाहजीभूप एव।

तं महानुभावमधिकृत्य बहुभिः बहवः श्लोकाः विरचिताः, तेषु स्थालीपुलाकन्यायेन द्वित्राल्लिँखामः।

अस्ति व्यानम्रवैरिक्षितिपतिमकुटश्रेणिमाणिक्यजाल-
प्रेङ्खोलत्स्फारदीप्तिप्रकरकृतपदाम्भोजनीराजनश्रीः।
श्रीमत्त्यागेशपादाम्बुरुहविहरणायत्तचित्तद्विरेफ-
स्मेरापाङ्गप्रसारप्रतिविहितसुधीमण्डलाखण्डलश्रीः॥

अस्तोकश्रीमदेकप्रभुसुकृतपरीपाकसम्प्राप्तजन्मा-
दीपाम्बागर्भदुग्धाम्बुधिलहरिसमुद्भावितः पारिजातः।
वाणीवेणीविराजद्बहुलपरिमलोदारसाहित्यसारः
सारङ्गाक्षीविलक्षीकरणमनसिजः शाहजिक्ष्माधिराजः॥ इति।

स कदाचित् राजा स्वसभास्तारान् रामभद्रदीक्षितादीनाहूय प्रेम्णा विज्ञापयामास। "मान्याः पण्डिताः, भवन्तस्सर्वेऽपि मिलित्वा

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तर्क,मीमांसा,सांख्य,योग,वेदान्त,व्याकरणानां सिद्धान्तान् सरलसरलैर्वाक्यैः क्रोडीकुरुत, येन बालानामपि तत्तच्छास्त्रेषु सुलभतया प्रवेशो भवेत्, शास्त्राणि सम्यगधीतानि निरूढानि भवेयुरि"ति ।

तेऽपि पण्डिताः शाहजीमहाराजस्य तस्य सार्वज्ञ्यं प्रशंसन्तः, तस्य शाश्वतीं कीर्तिं वर्धयन्तः सरलसरलैः वाक्यैः षण्णां दर्शनानां सिद्धान्तान् समगृह्णन् ।

प्रमाणं चास्य ग्रन्थस्य प्रस्तावनैव । पश्यत —

"सार्वज्ञ्यनिधिना तेन शाश्वतीं भूतिमिच्छता ।
सभाऽलङ्कारतां नीताः सादरं प्रेरिता बुधाः ॥

षड्दर्शनीस्थसिद्धान्तान् सङ्गृह्णीत यथोचितम् ।
सर्वेषामुपकाराय सरलैर्वचनैरिति ॥

रामभद्राध्वरिवरः रामनाथमखीश्वरः ।
नरहर्यध्वरिमणिः पेरियप्पबुधाग्रणीः ॥

श्रीवेङ्कटेशविबुधः श्रीमान्यज्ञेश्वराध्वरी ।
मखी च श्रीनिवासार्यः महतामपि सम्मतः ॥

शासनाक्षरमाकर्ण्य शाहराजस्य धीमतः ।
सप्तैते शास्त्रसिद्धान्तान् सङ्गृह्णन्ति यथामति ॥" इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अनेन प्रस्तावेन ज्ञायते — सप्तसंख्याकाः संख्यावन्त एते षट्दर्शनानां सिद्धान्तान् समगृह्णन् इति। परन्तु कः कः कं कं सिद्धान्तमाविश्च- करेति निर्णेतुं न किमपि प्रमाणमुपलभ्यते। परन्तु रामभद्रदीक्षितः अभिनवपतञ्जलिरिति तस्मिन्नेव समये प्रख्यापितः इति हेतोः, "शिलाया मपि चैतन्यसृजे" इति तत्रत्यश्लोकेन च निर्णीयते श्रीरामभद्र एव व्याकरणसिद्धान्तं विरचयामासेति। तथापि पूर्वोक्तानां पण्डितानां परिचयं यथामति दास्यामः। तद्दर्शनेन प्रियपाठका एव निर्णेतुं शक्नुवन्ति केन केन कः कः सिद्धान्तः कृतस्स्यादिति।

श्रीरामभद्रदीक्षितः

अयं च कण्डूमाणिक्यग्रामे कौण्डिन्यगोत्रे लब्धजन्मा व्यराजतेत्यस्माकं भागधेयमेव। अस्य च पिता यज्ञरामदीक्षितः। अयं चोक्तनाथमखीन्द्रात् न केवलं पातञ्जलीं व्याकृतिं, किन्तु पांचालीमिव तद्दुहितरं च स्वीचकार। नीलकण्ठदीक्षितादधिगतसाहित्यनिवहः तत्संसर्गादेव रामभक्तग्रामणीरभूत्। अयं श्रीकृष्णानन्दसरस्वतीश्रीपादस्य पादसरोजपरिचर्यालब्धात्मविद्यः "अचार्य- स्तवराजभूषणेन" तमलमकरोत्। श्रीपरमशिवेन्द्रयोगीन्द्रेण सदाशिवब्रह्मणा चानुगृहीतोऽयं तञ्जपुरीमण्डलाधिपेनाभिनवभोजेति विद्वद्भिः प्रशंसितेन शाहजीमहाराजेन स्वसभास्तारतारूपेण मानित इति पूर्वं दृष्टमेवाऽस्माभिः। अस्य बहवः शिष्याः, तेष्वन्यतमः नल्लादीक्षितः स्वगुरुं रामभद्रमेवं प्रस्तौति—

स किल जगति शेषः ख्यातमेधाविशेषः
पटुवदनसहस्रेणैव यं व्याचकार।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विशदयति मुखेनैकेन सर्वं तमर्थं
करबदरमिवाऽसौ देशिकः शाब्दिकानाम् ॥

चिन्तामणिप्रभृतिभूरिगभीरभाव-
ग्रन्थान्तरस्थघनवाक्यशिलाविभेदान् ।
वाक्चन्द्रिकाविसरणैः सरसीकरोति
नैयायिकेन्दुरिह सैष जगत्प्रकाशः ॥

श्रुतिवचनगोचराभिः, वाग्धाटीभिर्निरर्गलाभिरसौ ।
मीमांसतेऽध्वरमहो, जैमिनिरिव मूर्तिमानितो धीमान् ॥

वेदान्तविन्ध्यविपिने. दुरासदे मन्दविभवैरितरैः ।
विहरति विद्वत्सिंहः तदीयबुद्धेर्निदानमित एषः ॥

एभिः श्लोकैः नल्लादीक्षितः स्वगुरो रामभद्रदीक्षितस्य सर्वतन्त्रस्वतन्त्रत्वं व्याख्याय तच्छिष्यतां पवित्रीकरोति । अनेन जानकीपरिणयम्, उणादिमणिदीपिका, शब्दभेदनिरूपणं परिभाषावृत्तिव्याख्या, रामचापस्तवः इत्यादयः बहवः ग्रन्थाश्च निरमायिषत ।

रामनाथमखी

अयमपि शाहजीमहाराजस्य संसत्सद्पण्डितः । बालचन्द्रतनूजस्य "धर्मविजयचम्पू, जीवन्मुक्तिकल्याण, शृङ्गारसर्वस्वभाण, - अद्वैतरसमञ्जर्यादिग्रन्थजालस्य प्रणेतुः श्रीनल्लादीक्षितस्य गुरुः । अयं परमशिवेन्द्राचार्यसदाशिवब्रह्मेन्द्रयोरनुग्रहपात्रं, रामभद्रदीक्षितस्य समकालिकः पण्डितश्चेत्यलं विस्तरेण ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पेरियप्पाध्वरी

अयमपि शाहजीमहाराजस्य सदस्येष्वन्यतम एव। अयं ईश्वरस्य प्रपौत्रः कृष्णस्य पौत्रः अण्णाशास्त्रिणः अथवा पतञ्जलिशास्त्रिणः लक्ष्मीगर्भसंभूतः। अयं पञ्चनदक्षेत्रवासी स्यादिति ऊहः। अयं शृङ्गारमञ्जरीशाहजीयं नाम नाटकं विरच्य स्वसभापतेः शाहजीमहाराजस्य चरित्रमपि प्रख्यापयति। अस्य च पितृव्यः वैनतेयः रुचिदत्तकृततत्त्वचिन्तामणिप्रकाशस्य व्याख्यामकरोत्। विश्वनाथार्यदीक्षितः वैनतेयसूरिः इमौ पेरियप्पाध्वरिणः भ्रातरावेव। अस्य च गुरुः श्रीकृष्णानन्दसरस्वतीश्रीपाद एव। तेन च "कवितार्किकसार्वभौम" इति प्रेम्णा लालित इति श्रूयते। शाहजीराजेन पञ्चचत्वारिंशत्पण्डितेभ्यः गृहाणि शाहजीपुरे (तिरुविशलूर्, तंजावूर् जिला) विश्राणितानि। पेरियप्पाध्वरिणः गृहसंख्या १५.

श्रीधरवेङ्कटेशः

शाहजीमहाराजस्य सभास्तारेषु वेङ्कटेशशास्त्री, वेङ्कटेशदीक्षितः श्रीधरवेङ्कटेशः इत्येवं चत्वारः पण्डिताः दरीदृश्यन्ते। तेषु अत्र ग्रन्थे उल्लेखितः श्रीवेङ्कटेशः क इति निर्णेतुं प्रमाणाभावात् न शक्यते, तथापि तत्रत्येषु समाननामधेयेषु पण्डितप्रवरेषु श्रीधरवेङ्कटेशदीक्षितः प्रसिद्धतमः इति प्रबलातिक्रमे मानाभावादिति च तं स्वीकुर्मः।

श्रीधरवेङ्कटेश्वर इति सुगृहीतनामधेयोऽयं शाहजीपुरवास्तव्यः महाराजसंसत्सदस्यश्च। जनाः प्रेम्णा, इमं अय्यावाल इति आह्वयन्ति स्म।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अस्य च पिता लिङ्गाध्वरी। अयमनन्यशिवभक्तः इत्यत्र आख्याषष्टिः, दयाशतकं, कुलीराष्टकं शिवभक्तिकल्पलतिका इत्येवमादयः ग्रन्था एव प्रमाणम्। अस्य च कृती शाहेन्द्रविलासः, पद्मिनीमञ्जरी अपि विलसततराम्। अयं श्राद्धान्नं चण्डालाय दत्त्वा स्वशुद्धये गङ्गास्तोत्रेण भागीरथीमेव स्वगृहस्थकूपादानाययामासेति श्रूयते। प्रतिवर्षं तस्मिन्ग्रामे महोत्सवोऽयं कार्तिकमासि महताऽऽडम्बरेण प्रचाल्यते दृश्यते च। कविरयं वदति -- "पश्यत्वादनयादिमाऽखिलनयस्वातन्त्र्यमूर्जस्वलं धर्मिग्राहकमानसिद्धममृतस्फीताश्च यस्योक्तयः। तस्य श्रीधरवेङ्कटेशसुधियः लिङ्गार्यसूनोः कृतौ" इति अनेन तस्य षड्दर्शिनीस्वातन्त्र्यं व्यज्यते किल।

यज्ञेश्वराध्वरी

अयमपि रामभद्रदीक्षित समकालिकः पण्डितः, शाहराजस्य सभालंकर्मीणः, षड्दर्शनीसङ्ग्रहे उल्लिखितपूर्वः च। तथा च इतोऽप्यधिकतया तस्य परिचयं दातुं न प्रभवामः।

नरहर्यध्वरी

पूर्वोक्तविषयप्रतिपादनमेवाऽस्यापि समञ्जसं भवेत्।

श्रीनिवासार्यः

अयं रापभद्रदीक्षितस्य शिष्येष्वन्यतमः। सङ्कृतिगोत्रोद्भवोऽयं कृष्णस्यानन्तांबायामुद्भूतः। "स्वरसिद्धान्तचन्द्रिकायाः" शाहराजीयगीतस्य च कर्ता। अस्य गृहस्य संख्या ४०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एवमस्माभिः षड्दर्शनीपारङ्गतानां सप्तानां महानुभावानां परिचयः यथामति प्रतिपादितः । अत्र यदि स्याद्विप्रतिपत्तिः, क्षन्तु-मर्हन्ति सन्त इति प्रार्थयामः ।

"सिद्धान्तपरिचयः"

अथात्रत्यानां षण्णां दर्शनानां केवलं परिचयः दीयते। तत्तच्छास्त्राणां सिद्धान्ताः पण्डितैरेव प्रतिपादिताः इति न तत्र परिश्रमः क्रियते ।

किं नाम दर्शनम्

अस्माकं पूर्वतना महर्षयः सत्याऽसत्यविलक्षणात्मकं प्रपञ्चमिमं ज्ञानदृष्ट्या विलोक्य तत्रत्यतत्त्वं विमृशन्तः, जटिलान् प्रश्नांश्च सरलयन्तः परमकरुणया सर्वेषां प्राणभृतां कल्याणमभीप्सन्तः यानि तत्त्वानि आविश्चक्रुः तान्येव दर्शनानि इति प्रथामभजन्। तथा च निगूढतमस्य सरहस्यस्य प्रपञ्चस्याऽस्य समाधानपथप्रदर्शकं शास्त्रमेव दर्शनमित्यभिधीयते। दृश्यते अनेनेति दर्शनमिति हि व्युत्पत्तिः ।

अयं निष्कर्षः —— मनुष्यस्स्वभावतः मननशीलः । "न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्" इति रीत्या, "यन्मनसा ध्यायति तद्वाचा वदति, यद्वाचा वदति तत्कर्मणा करोती"ति रीत्या च मननशीलः मन्यते कोऽहं? कुतोऽहं? कस्मादहमिति । तथा च तादृशमनन-चिन्तनपरिणामपूर्वकमेवेदं दर्शनम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः ।
मत्वा तु सततं ध्येयः एते दर्शनहेतवः ॥"

इति हि दर्शनहेतवः प्रोच्यन्ते । युक्तं चैतत् — श्रुतयः बहून् विषयान् प्रतिपादयन्ति । वयं शृणुमः । श्रवणानन्तरं तान् विषयान् अधिकृत्य चिन्तयामः । तदानीं बहवः आक्षेपाः, तत्परिहाराय समाधानानि इत्येवंरीत्या उपपत्तयः प्रतीयन्ते । उपपत्तिः यदा निर्णीता भवति तदा स विषयः ध्येयो भवति इति कृत्वा प्रथमतः श्रवणं, मननं, निदिध्यासनं इति क्रमः प्रतिपादितः । ततः क्रमेण दर्शनं भवति । अत एवोपनिषदपि आत्मानमधिकृत्य घोषयति — "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्य" इति । इयमेव रीतिः सर्वेषामपि विषयाणामिति युक्तमुत्पश्यामः ।

तादृशदर्शनविचारेण यत् ज्ञानं भवति तदेव सर्वस्मा अपि कल्पेत इति द्रष्टारः मुनयः तत्तद्दर्शनानि आविश्चक्रुः । सामान्यतया न्यायवैशेषिक मीमांसावेदान्तसांख्ययोगात्मकानि षट् दर्शनानीति प्रोच्यन्ते प्रमतिभिः । चार्वाकीयादिदर्शनान्यपि यद्यपि दर्शनकोटावेवान्तर्भवन्ति तथापि तानि वेदमार्गमवलम्ब्य न प्रणीतानि इति न गण्यन्ते । तथा च दर्शनानि वैदिकानि अवैदिकानीति द्विधा भवन्ति ।

वेदस्यापौरुषेयत्वं अथवा ईश्वरकर्तृत्वं दार्शनिकैस्सर्वैरपि स्थापितं यदा, तदैव वेदः सर्वेषां प्राणभृतामाप्तो भवति । सः मनुष्यसमुदायस्य यद्धितं भवति अथवा न दृष्टं भवति तदेव प्रतिपाद्य मनुष्यं सन्मार्गे नयति । मनुष्यश्च स्वोपपत्तिभिः वेदप्रतिपादितं विषयं निर्णीय तन्मार्गमवलम्बते, स्वाभिमतं च प्राप्नोतीति सैद्धान्तिकः पन्थाः । तथाचोक्तम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"अवैदिकप्रमाणानां सिद्धान्तानां प्रदर्शकाः ।
चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः ॥

वेदप्रमाणकानीह प्रोचुर्ये दर्शनानि षट् ।
न्यायवैशेषिकादीनि स्मृतास्ते आस्तिकाभिधाः" ॥ इति ।

न्यायदर्शनम्

"प्रमाणप्रमेय" इत्यारभ्य "हेत्वाभासाश्च यथोक्ताः" इत्यन्तं पञ्चाध्यायात्मकं न्यायशास्त्रं गौतममुनिना प्रणीतम् । दृश्यतेऽनेनेति दर्शनं – न्यायस्य दर्शनं न्यायदर्शनम् । कोवा न्यायः ? प्रमाणैः प्रमेयपरीक्षणमेव । अयमेव न्यायः आन्वीक्षिकीशब्देनाऽपि व्यवह्रियते । प्रत्यक्षागमाभ्यां ईक्षितस्य न्यायैः अन्वीक्षणं इति आन्वीक्षकी न्यायशास्त्रमेव । इयमेव सर्वेषां शास्त्रकाराणां प्रदीपिकेव परमोपयोगिनीति प्रशस्यते ।

"प्रदीपः सर्वविद्यानां उपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता" ॥ इति ।

"न्यायविस्तरस्तु मूलस्तम्भः सर्वविद्यानां, वेदप्रामाण्यमूलत्वात् । तस्मादशेषतार्किकोपमर्दद्वारकं दृढतरवेदप्रामाण्यप्रत्ययाध्यायि न्यायोपदेशक्षमं अक्षपादोपदिष्टं न्यायविस्तराख्यं शास्त्रं प्रतिष्ठाननिबन्धनमिति परमविद्या-स्थानमिति"च जयन्तभट्टैरपि प्रशंसितत्वात्, शास्त्रस्याऽस्य प्राधान्यं न विहन्यते । अस्य सिद्धान्तोऽत्र प्रतिपादितः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"वैशेषिकदर्शनम्"

दर्शनमिदं महर्षिणा कणादेन प्रतिपादितम् । न्यायवैशेषिकेतिक्रमेण यद्यपि दर्शनमिदं द्वितीयत्वेन गण्यते तथापि कालतः पर्यालोच्यमाने प्रथमतया स्वीकर्तुं शक्यते । यतः वैशेषिके अनुमानप्रणाली संक्षेपेण प्रदर्शिता, न्याये महता विस्तरेण । हेत्वाभासाः वैशेषिके त्रय एव, न्याये तु पञ्च । इत्येवं कणादप्रोक्तस्य वैशेषिकस्य सङ्कोचविस्तराभ्यां परिवर्धनमेव न्यायशास्त्रमितिः ज्ञायते । किं च, कणादः गौतममुनेः पूर्वकालीन इति प्रतिभाति । "महद्दीर्घकालाद्वा ह्रस्वपरिमण्डलाभ्यां" इति व्यासेन, "न वयं षट्पदार्थवादिनः वैशेषिकवत्" इति सांख्यसूत्रेण, "कर्मैके तत्र दर्शनादि"ति जैमिनिवादेन ज्ञायते — अयं वैशेषिकसिद्धान्तः सर्वेभ्योऽपि दर्शनेभ्यः प्राचीन इति, किमुत गौतमादित्यलं विस्तरेण ।

अयं कणादः, कणभुक् इति, औलूक उलूक इति च तत्र तत्र व्यवहृतः । विशेषनामानं पदार्थमङ्गीकृत्य प्रवर्तमानत्वादस्य दर्शनस्य वैशेषिकनाम सङ्गच्छते ।

कणादोऽयं सप्तत्यधिकत्रिशतैः सूत्रैर्निबद्धं दशाध्यायात्मकं दर्शनं चक्रे । दर्शनमिदमेवं किल प्रशस्यते — "काणादं पाणिनीयं च सर्वशास्त्रोपकारकमि"ति । युक्तं च — कस्यचन शब्दस्य याथार्थ्यनिर्णये यथा वा व्याकरणशास्त्रं प्रमाणं भवति तथैव पदार्थस्वरूपनिर्णये वैशेषिकमिति । अत्र तादृशवैशेषिकसिद्धान्तः सम्यक् प्रतिपादितः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

का नाम मीमांसा

मीमांसाशास्त्रं धर्मव्याख्यानपरं शास्त्रम् । चोदनालक्षणो धर्मः । चोदना हि क्रिया प्रवर्तकवचनविशेषः, इति वेदविहितानां कर्मणां विमर्शकात्मकमेवेदं शास्त्रम् । उक्तं च शबरस्वामिना – “चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं, नान्यत्किंचनेन्द्रियमि”ति । तथा च विधिः श्रुतिविहितक्रियाकलापः । तस्मिन्नेव वेदवचनानां प्रधानं तात्पर्यमिति “आम्नायस्य क्रियार्थत्वा”दिति सूत्रेण सिद्धान्तितम् ।

तदेतन्मीमांसाशास्त्रं भगवता जैमिनिना द्वादशभिरध्यायैः प्रतिपादितम् । अतः “द्वादशलक्षणी” इत्यभिधीयते । “मान् वध् दान् शान्भ्यः, दीर्घश्चाभ्यासस्य” इति सूत्रे “मानेर्जिज्ञासायां नित्यसन्” इति वार्तिकादस्य मीमांसाशब्दस्य निष्पत्तिः कथ्यते । इयं च मीमांसा, पूर्वमीमांसा, उत्तरमीमांसा इति द्विधा । पूर्वमीमांसा च वेदप्रतिपाद्यस्य कर्मकाण्डस्य विमर्शकरणात्, उत्तरमीमांसायाः पूर्वभवत्वाच्च तन्नाम्नाऽऽहूयते । अतः कर्ममीमांसा इत्यपि वक्तुं शक्यते । तथा च मीमांसा नाम कर्मकाण्डप्रतिपादकः श्रुतीनां मिथः विरोधपरिहारकारकः ग्रन्थविशेष इति सिद्धम् । धर्मज्ञानमेवाऽस्य प्रयोजनम् ।

भाट्टमतम्

जैमिनिकृतायाः द्वादशलक्षण्याः भाष्यं भगवता शबरस्वामिना प्रणीतम् । तच्च पतञ्जलिकृतमहाभाष्यात् श्रीशङ्करकृतशारीरिकभाष्यान्नावर-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मिति वक्तुं शक्यते । उच्यते किल — अयं शबरस्वामी पूर्वं आदित्य-सेननाम्ना भूषितोऽभूत् । पश्चात् जैनादिभिरतीव पीडितः अरण्ये उवास । अतः शबरस्वामीति नाम जातमिति । अस्तु नाम । तादृशं भाष्यं न साधारणेन शबरेण कर्तुं शक्यत इत्यत्र न कोऽपि सन्देहः.

तादृशस्य शबरभाष्यस्य वार्तिककार एव कुमारिलभट्टः । अयं द्रविडदेशीयः श्रीशङ्कराचार्यसमकालिकः इति विमर्शकानां सिद्धान्तः । श्लोकवार्तिकतन्त्रवार्तिकादीनां प्रबन्धानां कर्ता । मीमांसकानां मध्ये भाट्टमतं प्राभाकरमतमिति दृश्यमानस्य भेदस्यायमेव मूलभूतः संवृत्तः । अस्याऽनुयायिन एव पार्थसारथिमिश्रमाधवाचार्यखण्डदेवप्रभृतयः । एतैर्महानुभावैः प्रणीतैर्ग्रन्थजालैरेव भाट्टमताख्यः सिद्धान्तविशेषः सुदृढः मीमांसकमूर्धन्यश्चाभवत् । अयमपि सिद्धान्तः सम्यक्तयात्र प्रतिपाद्यते ।

प्राभाकरमतम्

प्रभाकरोऽपि मीमांसक एव । द्वादशलक्षण्याः भाष्यं शाबरमेवाऽस्यापि मूलग्रन्थः । परन्तु तत्र तत्र प्रमाणप्रमेयादिविषये कश्चिद्भेदोऽस्तीति पृथक्तया सिद्धान्तः प्रतिपादनीय एव । यथा तर्कशास्त्रे नैयायिकानां वैशेषिकाणां च भेदोऽस्ति तथैव मीमांसायामपि भाट्टानां प्राभाकरादीनां च भेदः वर्तत एव । प्रभाकरोऽयं कुमारिलभट्टस्य शिष्यभूतोऽपि पृथक्सिद्धान्त-प्रवर्तको व्यराजत । अनेनाऽपि शाबरभाष्यस्य लध्वी बृहती चेति टीकाद्वयी विलिखिता वर्तते । भट्टाद्रिसदृशोऽयं पंच प्रमाणान्येव स्वीकरोति । इत्येवं प्रत्यध्यायं के के विषयाः प्रतिपादिताः इति प्राभाकरमतस्य सङ्ग्रहः कृतः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कर्मणैव मोक्षसिद्धिः न ज्ञानादिति स्पष्टतरं प्रतिपाद्यते। एवं मीमांसादर्शने मतद्वयमपि विशदतया एतदर्थमेव प्रतिपादितं भवतीति ज्ञायते। तत्तच्छास्त्रं पिपठिषूणां छात्राणां बुद्धिः तत्तच्छास्त्रज्ञानाधिगम एव प्रसरेत्। पठनानन्तरं चक्षुषी निमील्य यदि चिन्त्यते किं किं पठितम्? अस्य च तस्य च को भेदः? इति, तदाऽऽकुलतैव स्यात्। सा माभूदिति शास्त्रकारैः करुणया साधर्म्यवैधर्म्यप्रदर्शनपूर्वकं अत्र स्पर्शीकृतमित्यलं विस्तरेण।

सांख्यमतम्

संख्यायन्ते सम्यक् ज्ञायन्ते येन तत्सांख्यम्। मूलप्रकृतिः, प्रकृति-विकृतयः, केवलविकृतयः, प्रकृतिविकृतिभिन्नः पुरुष इति पञ्चविंशतितत्त्वानि अनेन दर्शनेन ख्यायन्ते इति सांख्यं, अथवा एतादृशं तत्त्वज्ञानं सम्यक्-ज्ञायत इति वा सांख्यं भवतु। दर्शनमिदं ये वदन्ति ते सांख्या इति व्यवह्रियन्ते। उक्तं च –

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशत् तेन सांख्यं प्रकीर्तितम्॥ इति।

"शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते"॥ इति च।

तेनाऽस्य शास्त्रस्य "तत्त्वसमास" इत्यपि नामान्तरम्। दर्शनस्याऽस्य प्रथमपुरुषः भगवान्कपिलः। कपिलोऽयं कर्दमस्य देवहूत्यां सञ्जात इति श्रूयते। अत्र तन्मतं सङ्ग्रहीतं तं भगवतो नारायणस्यावतारभूतं मन्यते। कपिलोऽयं महामुनिः तपश्चरित्वा बाल्य एव तत्त्वमिदं

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रकटीचकार । बादरायणसूत्रादिषु खण्डनरूपेण सांख्यदर्शनं विमृष्टम् गीतायामपि नाम्नोऽस्य परामर्शः इत्यादिकारणैरस्य प्राचीनत्वं न विहन्यते । आसुरिः, पञ्चशिखाचार्यः, सांख्यकारिकाकारः इत्येवमादयो बहवः कापिलमिदं दर्शनं वर्धयामासुः । अस्य सिद्धान्तोऽपि अत्र प्रतिपादितः ।

योगदर्शनम्

इदमपि दर्शनं कापिलमिव प्राचीनतममेव । दर्शनस्यास्य प्रवर्तयिता भगवान्पतञ्जलिः । सः मुमुक्षूणां कल्याणाय समाधि साधन विभूति कैवल्याभिधानैः चतुर्भिः पादैः उपनिबद्धं योगशास्त्रमिदमाविश्चकार । "अथ योगानुशासनमि"त्यारभ्य, "जन्मौषधिमन्त्रतपः समाधिजास्सिद्धयः" इत्यन्तं च योगशास्त्रं विलिख्य कैवल्यपदप्राप्तये मार्गमेकमातेने । इत्येवं सर्वत्र विख्यातं दर्शनमपि अत्र प्रतिपाद्यते ।

वेदान्तदर्शनम्

सर्वदर्शनमूर्धन्यभूतं वेदान्तदर्शनं भगवता बादरायणेन चतुरध्यायैः प्रकटीकृतम् । इदमेवोत्तरमीमांसेति कथ्यते । जैमिनिकृता चतुर्दशलक्षणी पूर्वमीमांसा चेत् बादरायणकृता चतुर्लक्षणी "अथातो ब्रह्मजिज्ञासा" इत्यारभ्य "अनावृत्तिः शब्दात् अनावृत्तिः शब्दादि"त्यन्ता उत्तरमीमांसा भवति । प्रथमाध्यायः सर्वेषामपि वेदान्तानां साक्षात्परम्परया वा प्रत्यगभिन्नेऽद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयं पतिपादयति । द्वितीये, प्रतिपादिते समन्वये

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सम्भावितस्मृतितर्कादिविरोधमाशङ्क्य तत्परिहारपुरस्सरं तदविरोधः प्रदर्शितः। तृतीये, महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः परिहृतः। जीवविषयाणां च साधननिरूपणं, तत्त्वं पदार्थविचारः, नानाशाखासु पठितेषु विषयेषु पुनरुक्तिपरिहारः, सगुणविद्यासु शाखान्तरीयगुणोपसंहारानुपसंहारौ, इत्येवमादयः विषया निरूपिताः। चतुर्थे निर्गुणब्रह्मविद्यायाः बहिरङ्गसाधनानि, अन्तरङ्गसाधनानि, गुणनिर्गुणविद्ययोः फलविशेषनिर्णयःकृतः। एवं चतुर्लक्षणी; बहुविधान्विषयान्सप्रपञ्चं निरूप्य मोक्षसाधनं ज्ञानमुत्पादयतीति सर्वदर्शनमूर्धन्यत्वं स्थिरीकरोति।

अस्याश्च चतुर्लक्षण्याः भगवान् श्रीशङ्करभगवत्पादः प्रथमतया भाष्यं विरचयामास। तच्च प्रसन्नं गम्भीरं च। तेन सर्वेषामपि वेदान्तवाक्यानां अद्वितीये ब्रह्मण्येव तात्पर्यमिति औपनिषदः पन्थाः प्रदर्शितः। पश्चात् पश्चादागताः रामानुजादयः स्वस्वमतानुसारेण बादरायणसूत्राणि व्युत्पादितानीति विदुषां विदितमेव।

अस्य च शाङ्करस्य भाष्यस्य पद्मपादः विवरणं, वाचस्पतिमिश्रः भामतीं विलिखतःस्म। पुस्तकेऽस्मिन् "सर्वसिद्धान्तसम्मतमिदं औपनिषदं मतं" लिख्यते इति प्रथमतः प्रतिज्ञातम्। "परस्परं विरुध्यन्ते तैरयं न विरुध्यते" इति रीत्या समञ्जसमेव। तथाहीति प्रतिपादयितुं यद्यपि शक्यते, तथापि विस्तरभयाद्विरम्यते। मण्डनमिश्रः, सुरेश्वरः, अप्पय्यदीक्षितः — इत्येवमादयः शताधिका महानुभावाः दर्शनमिदं स्वस्वकृतिविशेषैः विस्तारयामासुः। सामान्यतया वेदान्तिमतं, विशिष्टतया अद्वैतमतमत्र प्रदर्शितमिति मन्तव्यम्।

C

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

व्याकरणदर्शनम्

सर्वेषामपि जनिजुषां विदितमेवैतत्, यत् भाषा नाम परस्परव्यवहारे साधनं परस्परभावाविष्करणे च प्रधाना भवति इति। सा यदि न शुद्धा तदाऽसाधुशब्देन भावः नावगतो भवेत्। अतः संस्कृता भाषैव निस्सन्देहं भावाविष्करणे समर्था भवतीति संस्कृतेः प्राधान्यं न विहन्यते। सा च संस्कृतिः व्याकरणेनैव भवितुमर्हति। उच्यते किल —

"इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते"॥ इति।

व्याक्रियतेऽनेनेति व्याकरणम्। कर्तृकर्मक्रियादिपदजालैरुपनिबद्धं वाक्यमेव परस्परभावाविष्करणे प्रभवतीति पदशास्त्रं प्रधानं भवति। तेन शास्त्रेणैव भाषा संस्कृता भवति।

"नूनं व्याकरणं कृत्स्नं अनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किंचिदपभाषितम्॥

इति हनूमन्तमधिकृत्य रामवचनमपि द्रढयति पूर्वोक्तं विषयम्।

तच्च व्याकरणं भगवता पाणिनिना अष्टाध्याय्यात्मकं प्रणीतम्। कात्यायनेन वार्तिकं च तत्र तत्र प्रतिपादितम्। भगवान्पतञ्जलिः भाष्यमाततान। इत्थं व्याकरणे मुनित्रयस्य प्राधान्यमुत्तरोत्तरबलीयस्त्वं चोद्घुष्यते। यद्यपि

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ॥
सारस्वतं चापिशलं शाकलं पाणिनीयकम्" ॥ इति

नव व्याकरणानि प्रतिपाद्यन्ते तथापि पाणिनीयव्याकरणसदृशमन्यद्व्याकरणं नप्रसिद्धं नानुष्ठानयोग्यमिति त्यज्यते, स्वीक्रियते पाणिनीयमेव प्रामाणिकत्वेन ।

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः" ॥ इति

लक्षणानुसारेण सूत्राणि निर्माय अष्टाऽध्यायाः प्रतिपादिताः पाणिनिना । अष्टस्वप्यध्यायेषु प्रतिपादिता विषया एवम् –

"सूत्राणां क्रमविन्यासः रुचिरो मुनिना कृतः ।
निरीक्ष्यतां सावधानं पूर्णं च परितुष्यताम् ॥

संज्ञानां परिभाषाणां पूर्वाध्याये प्रदर्शनम् ।
समासश्च विभक्त्यर्थाः द्वितीयाध्यायगोचराः ॥

तृतीये धातुविहिताः प्रत्ययाः सुव्यवस्थिताः ।
तुर्यपञ्चकयोरुक्ताः अवशिष्टाश्च ते क्रमात् ॥

षष्ठे प्रकृतकार्याणि प्रायेण दर्शयन्मुनिः ।
सप्तमे प्रत्ययस्थानि द्विष्ठानि च यथाक्रमम् ॥

अष्टमे पूर्वचरणे पदकार्यं समासतः ।
यान्यसिद्धानि पूर्वत्र त्रिपाद्यां तान्यवेशयत् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृत्वा पूर्णमनोयोगं शिष्यप्रियचिकीर्षया ।
पाणिनीयमिदं पाठ्यं गुरुभिः करुणार्णवैः ॥

शब्दाम्बोधितितीर्षा चेत् व्याकृत्याधिजिगांसुना ।
पाणिनीयं प्रयत्नेन समभ्यस्यं तदर्थिभिः ॥"

इत्येवं केनचिन्महानुभावेन प्रतिपादिता विषयाः क्रोडीकृताः । तदुक्तिरेवाऽस्माभिस्स्वीकृतेति तदर्थं तस्मै कृतज्ञता निवेद्यते । वार्तिककारः पाणिनेः पश्चादागतः पाणिनिकालादनन्तरं प्रचलितान् शब्दान् क्रोडीचकार वार्तिकरूपेणेति तत्प्राधान्यं उद्घुष्यते । तदनन्तरजः भगवान् पतञ्जलिः वार्तिककारादपि अत्यधिकान् शब्दान् स्वीकृत्य तेषामपि साधुत्वं प्रतिपादितवानिति तस्मादपि भाष्यकारस्य प्रामाणिकत्वं स्वीक्रियत इति उत्तरोत्तरबलीयस्त्वं युक्तमुत्पश्यामः । "महाभाष्यं वा पठनीयं, महाराज्यं वा शासनीयमि"ति लोकोक्तिरेव महाभाष्यप्राशस्त्ये विरुदावलिरिव प्रकाशते इत्यलं विस्तरेण ।

भट्टोजिदीक्षितः, नागेशभट्टः, भर्तृहरिः, इत्येवमादयः बहवो महानुभावाः विवर्तवाद-स्फोटवादादिभिरलंकृत्य व्याकरणशास्त्रं पारावारसदृशं वर्धयामासुरिति शम् ।

अस्मिन्पुस्तके तद्व्याकरणमपि अभिनवपतञ्जलिविरुदभूषितेन प्रत्यग्रप्राचेतसेन श्रीरामभद्रदीक्षितेन प्रतिपाद्यत इति विशेषः । यद्यपि

"शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः" ॥ इति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वेदाङ्गत्वमेव व्याकरणस्य प्रतिपादितम्; तथापि दर्शनशब्दव्युत्पत्तिः तस्मा अपि घटत इति दर्शनकोटौ तदन्तर्भावः न दोषायेति मन्तव्यम् ।

अत्र तर्के नैयायिक वैशेषिक सिद्धान्तौ, मीमांसायां भाट्ट-प्राभाकरसिद्धान्तौ, सांख्यसिद्धान्तः, योगसिद्धान्तः, वेदान्ते सामान्य-विशिष्टसिद्धान्तौ, व्याकरणसिद्धान्त इति षण्णां दर्शनानां सिद्धान्ताः क्रोडीकृताः ।

मातृकाविवरणम्

"सरस्वतीमहाल्" इति प्रसिद्धेऽस्माकं ग्रन्थालये "षड्दर्शनी-सिद्धान्तसङ्ग्रहः" इति नाम्ना तिस्रः मातृकाः वर्तन्ते । एका ग्रन्थाक्षराङ्किता तालपत्रात्मिका, अन्या तेलुगुलिप्यङ्किता तालपत्रात्मिका, अपरा देवनागर्यङ्किता कागदपत्रात्मिका इत्येवं तिस्रः मातृकाः आकृत्या लिप्या च भिन्ना अपि विषयतः सोदर्य इवाऽभिन्ना एवावर्तन्त । अतः पाठभेदस्य अथवाऽन्योन्यविशेषस्य वाऽवकाशो न विद्यते ।

विज्ञप्तिः कृतज्ञतानिवेदनं च

प्रस्तावनानिर्माणेऽस्माभिः, डा. द्विजेन्द्रनाथ झा महाशयैः कृतः संस्कृतसाहित्यविमर्शः, डा. राघवार्यैः सम्पादितः शाहेन्द्रविलासश्चाधीतौ । बहुधा बहुशः बहवो विषयाः स्वीकृताः । तदर्थं ताभ्यां महानुभावाभ्यां साञ्जलिबन्धं प्रणामततीस्समर्पयामः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ग्रन्थस्याऽस्य सम्पादने मामधिकारिणं मत्वा प्रोत्साहं दत्तवत्यै, ग्रन्थालयस्य निर्वाहकसमित्यै तथैव मुद्रणे साहाय्यं कृतवद्भ्यः मुद्राक्षरशालाकर्मचारिभ्यश्च सर्वेभ्यः महामहिमवद्भ्यः कार्तज्ञ्यं निवेदयामः। विशेषतश्च ग्रन्थस्याऽस्य प्रकाशने धनसाहाय्यं कृतवते मद्रासीयसर्वकाराय सश्रद्धं कृतज्ञतां निवेदयामः।

प्रार्थना

प्रार्थयामश्च प्रियपाठकान् — गच्छतस्स्खलनमिति रीत्या यदि दोषास्स्युः तान् क्षन्तुमर्हन्तु सन्तः, प्रोत्साहयन्तु च मामुत्तरोत्तर-कर्मणि। सूक्त्याऽनया समापयामश्च प्रस्तावनामिमाम् —

सन्तस्स्वभावमधुराः सुजनोपहार-
सम्भारमात्रशरणाः करुणारसार्द्राः।
अभ्यर्थये कृतिमिमां कृतिनो वहन्तः
प्रेमस्पृशा ननु दृशा परिशीलयन्तु ॥

इत्थं विद्वद्विधेयः

सरस्वतीमहाल्, तंजपुरी,
16—5—'80.

P. M. पद्मनाभशर्मा.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ ஸ்ரீ: ॥

முகவுரை.

பண்டிதப்பெருமக்களே! வணக்கம்.

பண்டைக் காலத்திலிருந்தே நம் தமிழகத்தில் தஞ்சைமாநகரத்திற்குத் தனிச்சிறப்பு உண்டு என்பது உலகமறிந்த உண்மையாகும். சோழர்களின் கலைத்திறனைக் காண்பிக்கும் பெரியகோவில் இங்குதானே உள்ளது. நாயகர்களின் காலத்தில் கட்டப்பட்ட வைணவாலயங்களும் அரண்மனையும் இங்கு சிறப்புற்று வீற்றிருக்கின்றன. மராட்டியர் காலத்தில் சரபோஜிமன்னன் ஸ்தாபித்த சரஸ்வதிமகால் என்ற நூல்நிலையம் மனிதனின் இதயத் துடிப்புபோல் நகரின் மத்தியில் துடிப்புடன் இருப்பதை இங்குதான் காண்கிறோம். காவிரி என்ற பொன்னி பிறந்த இடம் வேறாக இருப்பினும் புகுந்த இடமாகிய தஞ்சை தரணியில்தான் தன் முழுச்சாரத்தையும் வெளிப்படுத்தி பொன்னுடாக்குகின்றாள். அவள் "சோழநாடு சோறுடைத்து" என்று பெயரை அளித்ததுடன் தன்நீரோடு கலைகளையும் கலந்து ஊட்டி தஞ்சையை கங்கைச்சமவெளியாக்குகிறாள். நாயகர், மராட்டியர் இவர்கள் காலத்தில் பொன்னியின் இருகரைகளிலும் எண்ணற்ற புலவர்களும், பண்டிதர்களும் சாத்திரவிற்பன்னர்களும் தோன்றினர், ஏன்? வடக்கிலிருந்தும் பலர் இங்கு குடியேறி கலைகளிலும் விசேடமாக வடமொழியிலும் இலக்கிய இலக்கணங்களிலும் சிறந்த புலமைபெற்றனர் என்ற வரலாறும் உண்டு. இவ்வாறு வரலாற்று சிறப்புமிக்கத் தஞ்சையை 1676—1855 வரையில் ஆண்ட பெருமை மராட்டிய மன்னர்களுக்குண்டு:

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

மராட்டிய மன்னர்களில் 1684—1710 வரையில் தஞ்சையை ஆண்டவர் ஷாஜீ மாமன்னருவார். இவர் பிறவியிலேயே கவியாகவும், சங்கீத கலையில் ஆற்றலுள்ள வராகவும், பன்மொழிப்புலவராகவும் திகழ்ந்தார். இவரை அக்காலத்திய புலவர்கள் அபிநவபோஜன் எனப்போற்றிப் புகழ்ந்தனர். பண்டிதர்களிடம் பேரன்புகொண்டார். பல இலக்கியங்களையும், சாத்திரங்களையும் படைப்பதற்கு புலவர்களை உற்சாகப்படுத்தினர். தானும் இலக்கியங் களையும் சங்கீதக்கீர்த்தனைகளையும் இயற்றி வழிகாட்டினர். இவர் இயற்றிய நூல்கள் அதிகமாக வெளிவராமையால் இவரின் பேரறிவு மக்கள்வரையில் வரவில்லை. அப்பணியை எங்கள் நூலகம் ஏற்றுநடத்தி வெளியிடுவதற்கு முயற்சி செய்துகொண்டு வருகிறது என்பதைப் பெருமையுடன் தெரிவித்துக்கொள்கிறோம்.

"கற்றுரை கற்றுரே காமுறுவர்" என்றபடி இம் மன்னன் ஏகோஜிபுரம், ஷாஜீபுரம், தீபம்பாபுரம் போன்ற கிராமங்களை உண்டாக்கி மாபெரும் புலவர்களையும் பண்டிதர்களையும் குடியேறச்செய்தான். திருவிசலூர் என்று அழைக்கப்படும் ஷாஜீபுரத்தில் 46 பண்டிதர்களுக்கு கிரஹ தானம் செய்ததாக சாசனங்கள் கூறுகின்றன. வீடுகளை அளித்ததோடு அப்புலவர்பெருமக்களின் குடும்ப நிர்வா கத்தையும் தானேஏற்று அவர்களை இலக்கிய பணியிலேயே ஈடுபடச்செய்த பெருமை வள்ளல் ஷாஜீ மன்னனுக்கே உரியது. அப்புலவர்களும் இலக்கண இலக்கியங்களிலும், சாத்திரங்களிலும் பல நூல்களை இயற்றுவதுடன் ஆயிரக் கணக்கான மாணவர்களுக்கும் கல்விபுகட்டினர். இவ்வாறு தமிழகம் ஷாஜீயினுடைய ஆட்சிக்காலத்தில் நீர்வளம், நில வளம் இவைகளுடன் கலைவளம் பொருந்தியதாய் ஓர் பல்கலைக்கழகம் போல் காட்சியளித்தது.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இவ்வாறு பெருமைவாய்ந்த ஷாஜீமன்னனின் சபையை "ராமபத்ரதீக்ஷிதர்", "ராமஞுதமகி", "நரஹரிதீக்ஷிதர்", "வேங்கடேசதீக்ஷிதர்", "யக்ஞேச்வரதீக்ஷிதர்", "பெரியப்பாதீக்ஷிதர்", "ஸ்ரீனிவாஸதீக்ஷிதர்" என்ற மாபெரும் பண்டித பெருமக்கள் அலங்கரித்தனர். இவர்கள் திருவிசலூர் என்ற ஷாஜீபுரத்தில் ஷாஜீமன்னனுல் குடி-யேற்றப்பட்டு கலேப்பணியில் ஈடுபட்டனர். இவர்கள் வீடுகளின் எண் கூடசொல்லமுடியமென்பதால் இது கற்பனே யல்ல. இப்புலவர்கள் பலநூல்களே இயற்றியதுடன் பல மாணவர்களேயும் தங்களேப்போல் திறமைமிக்கவர்களாகச் செய்தனர். அவர்களும் அவ்விதமே பலநூல்களேப் படைக்கும் பெருமையைப் பெற்றனர் என்ற விவரம் ஆதாரங்களுடன் சொல்லமுடியுமாஞலும் "முகவுரை விரிவுபெறும்" என்ற காரணத்தால் சுருக்கமாகச் சொல்லியுள்ளோம்.

தஞ்சைப் பேரரசன் ஷாஜீமன்னன் ஒருநாள் தன் சபை அணிகளான முன்புகூறிய பண்டிதப் பெருமக்களுக்கு அன்புப்பணியிட்டான். புலவர்களே! பொதுவாக மக்கள் இலக்கியப்பணியில் ஈடுபாடு உடையவர்களாக இருப்பது மகிழ்ச்சிக்குறியதே. ஆயினும் "தர்க்கம்", "மீமாம்சை", "வேதாந்தம்", "வியாகரணம்", "சாங்கியம்", "யோகம்" என்ற ஆறு சாஸ்திரங்களிலும் புலமை பெற வேண்டும். இவைகள் ஒவ்வொன்றும் கடல்போன்றவை. பலவருடங்கள் படிக்கவேண்டியவை. சிரமப்பட்டு ஒன்றைப் படித்தாலும் மற்றென்ருேடு ஒப்பிட்டுப் பார்ப்பது மிகக் கடினமாகும். ஆகவே நீங்கள் பலசாஸ்திரங்களே நன்கு கற்றவர்கள், அவைகளில் பலநூல்களேயும் இயற்றும் திறமைப்படைத்தவர்கள், நீங்கள் எல்லோரும் ஒன்று சேர்ந்து ஆறு சாஸ்திரங்களின் தத்துவங்களேயும் எளிய நடையில் எல்லோரும் புரிந்துகொள்ளும்வகையில் வடித்துக்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கொடுத்தீர்களானுல் பயிலும் மாணவர்களுக்கு உற்சாகம் உண்டாகும். சிறிது கற்றவர்களுக்கும் முழுமை ஏற்படும். நன்கு கற்றவர்களுக்கு ஞாபகமூட்ட உதவும். ஆக எல்லோர்க்கும் பயன்தரக்கூடியதாய் இருக்கும். இதனுல் சாஸ்திரங்களும் மறையாமல் இருப்பதற்கு ஏதுவாகும், அடிபணிந்து வேண்டுகிறேன். ஆறு சாஸ்திரங்களையும் சுருக்கமாக எழுதித்தாருங்கள் என்ருன்.

புலவர்களும் " அரசன் அன்புக்கட்டளையை மகேசனின் அறக்கட்டளை " என மதித்து அந்தந்த சாஸ்திரங்களின் கொள்கைகளை எளிய நடையில் சுருக்கித்தந்தனர். அதுதான் நாம் வெளியிடும் " ஷட்தர்சனீசங்கிரகம் " என்ற நூலாகும். இவைகளை எழுதிய பண்டிதர்களின் வரலாறு வடமொழி முகவுரையில் இடம்பெற்றுள்ளது.

சாஸ்திரங்களின் வரலாறு.

பொதுவாக மனிதன் சிந்தனைசெய்யும் சக்திபடைத்தவன். ஆறறிவு படைத்த அவன் ஓர் நிமிடம்கூட வீணுக உட்கார்ந்திருக்கமுடியாது. மிருகங்களைப்போன்று உணவு உறக்கம் மாத்திரம் அவன் வேலையல்ல. ஆகவே அவன் மனம் உலகத்தின்பால் செல்கிறது. நாம் யார், எங்கிருந்தோம், எங்கு செல்வோம், எங்கு சென்ருல் நிரந்தரமான இன்பம் அடையலாம் என்ற சிந்தனை அவன் மனதில் உதயமாவது இயல்பு. இதற்கு அடிப்படையான ஆதாரங்களைத் தேடுகிருன். நம் முன்னோர்களான முனிவர்கள் என்ன கூறுகின்றனர் ? அவைகளில் எது அதிக ஆராய்ச்சியால் கண்டுபிடிக்கப்பட்டது ? அதன் ஆதாரங்கள் எதனுல் பிரமாணமாகும் ? கடைசியில் ஒன்றைத் தீர்மானித்து அவ்வழிசெல்வதே சிறந்தவழி என்று தீர்மானிக்கிருன். இவைகளின் முடிவுகள்தான் தர்சனங்கள் அல்லது சாஸ்திரங்கள் என்று கூறலாம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தர்சனங்களில் சில, மொழியின் சொல், பொருள் இவைகளை ஆராய்கின்றன. இவைகளை வியாகரணம் அல்லது இலக்கணம் என்போம். சில, உலகத்தின் பொருள்கள், பூதங்கள், பௌதிகங்கள் இவைகளை அலசுகின்றன. இவைகளை தர்க்கம் அல்லது நியாயம் என்போம். சில, வேதங்களில் கூறப்பட்ட பொருள்களை ஆராய்கின்றன. இவைகளை மீமாம்சை என்போம். சில உபநிடதங்களையும், அதன் அடிப்படையில்வந்த பிரும்ம சூத்திரங்களையும் புகட்டுகின்றன. அவைகளை ஆன்மீகத்துறையில் செய்த ஆராய்ச்சியென்றும், வேதாந்தம் என்றும் பகர்வோம். சில, இவைகளையே அடிப்படையாகக்கொண்டு யோகம், சாங்கியம் என்ற மாறுபட்ட மார்க்கங்களை வழி வகுக்கின்றன. இவைகளை சாங்கியமென்றும் யோகமென்றும் கூறலாம். ஆக இவ்வாறு ஆறு தர்சனங்களும் வெவ்வேறு வகையில் ஆராய்ச்சிசெய்து மனிதனுடைய சிந்தனை சக்தியைத்தூண்டிவிடுவதால் தர்சனம் என்பதை ஆராய்ச்சி நூல் என்று சுருங்கக்கூறலாம். ஆக வியாகரணம், தர்க்கம், மீமாம்சை, வேதாந்தம், சாங்கியம், யோகம் என்ற ஆறு தர்சனங்களும் உலகத்தையும் வேதத்தையும் அடிப்படையாகக்கொண்டு ஆராயப்பட்ட நூல்கள். இவை பலப்பல நூற்றாண்டுகளுக்கு முன்பாகவே பாணிநி, ஜைமினி, வியாசர், கௌதமர், கபிலர், பதஞ்சலி முதலிய மகான்கள் ஈடுபட்டுத் தங்கள் தங்கள் கொள்கைகளை வெளியிட்டுள்ளனர். கொள்கைகள் மாறுபட்டிருப்பினும் "தத்வம்" என்றநிலை ஒன்றே.

எங்கள் நூலகத்தில் இந்தநூலைச் சொல்லக்கூடிய மூன்று சுவடிகள் உள்ளன. ஒன்று கிரந்தலிபியிலும் மற்றொன்று தெலுங்கு லிபியிலும் வேறொன்று தேவநாகரியிலும் உள்ளது. ஆயினும் கிரந்த எழுத்தில் எழுதிய சுவடிதான் மற்றவைகளுக்கு மூலம் என்று சொல்லி விடலாம். இதற்கு ஆதாரங்கள் உண்டு. ஆகவே மூன்று

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

சுவடிகளும் ஒரு தாய் குழந்தைகள்போல் எழுத்து வேறு பட்டிருப்பினும் பொருளில் மாறுபடவில்லை. பாடபேதத் திற்கு இடமேயில்லை,

இந்த நூலை வெளியிடுவதற்குத் தகுதியுள்ளவன் என்று என்னை மதித்து வெளியிடும் பணியை அளித்த "எங்கள் நூலக நிர்வாகத்தினர்களுக்கும்", பொருள் உதவிசெய்த "மத்திய அரசாங்கத்தாருக்கும்", பிழையின்றி அச்சாக்கிய எங்கள் "அச்சகத்தார்களுக்கும்" என்றும் கடமைப்பட் டுள்ளேன். இதைப்படித்துச் சிறிதளவேனும் பயன்பெற்று அதனால் அந்தந்த சாஸ்திரங்களில் முழுப்பயன்பெற வழி செய்ததில் பெருமைப்படுகிறேன்.

வணக்கம்.

தஞ்சை,
25—5—1980.

பி. எம். பத்மநாப சர்மா,
வடமொழிப் பண்டிதர்.

***
*

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ षड्दर्शनीसिद्धान्तसङ्ग्रहः ॥

[श्रीरामभद्रदीक्षितादयः दार्शनिकाः]

प्रदिशतु मङ्गलमनिशं पञ्चाननसूनुरद्भुतः करटी ।
सञ्चरति स्वैरं यस्सरसं निखिलागमाग्रेषु ॥ १ ॥

कटाक्षैर्लब्धात्मा तव क इति पृष्टे स्मरजिता
क्रियैव प्रत्युक्तिर्भवतु भवदीया न कथये ।
इति स्वाभिप्रायं मधुरदरहासेन गृणतीं
शिवामीशः श्लिष्यन्नवतु भवतः स्मेरवदनः ॥ २ ॥

अस्ति व्यानम्रवैरिक्षितिपतिमकुटश्रेणिमाणिक्यजाल-
प्रेङ्खोलस्फारदीप्तिप्रकरकृतपदाम्भोजनीराजनश्रीः ।
श्रीमत्त्यागेशपादाम्बुरुहविहरणायत्तचित्तद्विरेफः
स्मेरापाङ्गप्रसारप्रतिविहितसुधीमण्डलाखण्डलक्ष्मीः ॥ ३ ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अस्तोकश्रीमदेकप्रभुसुकृतपरीपाकसम्प्राप्तजन्मा
दीपाम्बागर्भदुग्धाम्बुधिलहरिसमुद्भावितः पारिजातः ।
वाणीवेणीविराजद्बकुलपरिमलोदारसाहित्यसारः
सारङ्गाक्षीविलक्षीकरणमनसिजः शाहजिक्ष्माधिराजः ॥ ४ ॥

सार्वज्ञ्यनिधिना तेन शाश्वतीं कीर्तिमिच्छता ।
सभालङ्कारतां नीतास्सादरं प्रेरिता बुधाः ॥ ५ ॥

षड्दर्शनीस्थसिद्धान्तान् सङ्गृह्णीत यथोचितम् ।
सर्वेषामुपकाराय सरलैर्वचनैरिति ॥ ६ ॥

रामभद्राध्वरिवरो रामनाथमखीश्वरः ।
नरहर्यध्वरिमणिः पेरियप्पबुधाग्रणीः ॥ ७ ॥

श्रीवेङ्कटेशविबुधः श्रीमान्यज्ञेश्वराध्वरी ।
मखी च श्रीनिवासार्यो महतामपि सम्मतः ॥ ८ ॥

शासनाक्षरमाकर्ण्य शाहराजस्य धीमतः ।
सप्तैते शास्त्रसिद्धान्तान् सङ्गृह्णन्ति यथामति ॥ ९ ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ प्रथमं सङ्ग्रहश्लोकः ॥

अष्टौ चाष्टौ पदर्थाः पदनयनमते तन्निरतिर्मुक्तिहेतुः
  षट् ते वैशेषिकाणामथ विधिविहितं कर्म काम्याच्च भिन्नम् ।
भाट्टप्राभाकराणामुपनिषदुदितं ज्ञानमद्वैतिनां चेत्
(¹ सांख्यानां मुक्तिहेतुः) स च समवहितो योगिनां योगसिद्ध्या
॥ १० ॥

॥ प्रथमं न्यायमतं लिख्यते ॥

तत्र प्रतिपाद्या विषयाः प्रमाणादयः षोडश पदार्थाः । तेषां तत्त्वज्ञानान्मोक्षप्राप्तिः फलम् । तथा च सूत्रम् — "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल-जातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगम" इति । तत्र प्रमायाः करणं प्रमाणम् । प्रमा च यथार्थानुभवः । अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम् । तत्रासाधारणकारणं करणम् । तच्च प्रमाणं चतुर्विधम् । प्रत्यक्षं, अनुमानं, उपमानं, शब्द इति । तत्र साक्षात्कारिप्रमायाः करणं प्रत्यक्षं प्रमाणम् । इन्द्रियार्थसन्निकर्षजन्या बुद्धिः साक्षात्कारिप्रमा । सा च द्विविधा — सविकल्पकनिर्विकल्पकभेदात् । निष्प्रकारकं ज्ञानं निर्विकल्पकम् । सप्रकारकं प्रत्यक्षं सविकल्पकम् । सा च षड्विधा — चाक्षुषादिभेदात् । तत्र नीलपीतादिलक्षणरूपतदाश्रयविषयिणी चक्षुर्जन्या

१. मातृकासु सर्वास्वपि तत्स्थानं शून्यतया दृश्यत इति पूर्तिः कृता.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चाक्षुषप्रमा । शीतोष्णादिस्पर्शतदाश्रयविषयिणी त्वगिन्द्रियजन्या त्वाचप्रमा । ककारादिवर्णविषयिणी श्रोत्रजन्या श्रावणप्रमा । सौरभादिगन्धविषयिणी घ्राणजन्या घ्राणप्रमा । मधुराम्लतिक्तादिरसविषयिणी रसनेन्द्रियजन्या रासनप्रमा । आत्मतद्गतसुखादिविषयिणी मनोजन्या मानसप्रमा । तत्करणानि च यथाक्रमं चक्षुरादीनि ।

तत्र द्रव्यादिग्राहकाणि चक्षुस्त्वङ्मनांसि । इतराणि गुणादिग्राहकाणि । साक्षात्कारिप्रमाहेतुः सन्निकर्षः षड्विधः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणतेति । तत्र द्रव्यग्राहकः संयोगः । द्रव्यगतगुणकर्मजातिग्राहकः संयुक्तसमवायः । गुणकर्मगतजातिग्राहकः संयुक्तसमवेतसमवायः । शब्दग्राहकस्समवायः । शब्दगतकत्वादिग्राहकः समवेतसमवायः अभावसमवाययोर्ग्राहिका विशेषणतेति । एवं प्रत्यक्षं निरूपितम् ।

अनुमानं निरूप्यते । अनुमितिप्रमाकरणमनुमानम् । व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यं "पर्वतो वन्हिमान्" इत्याद्याकारकं ज्ञानमनुमितिः । व्याप्तिश्चाविनाभावः । सामानाधिकरण्यावच्छेदकरूपवत्त्वं वा नियतसाहचर्यं व्याप्तिरिति पर्यवसितम् । पक्षधर्मता पक्षे विद्यमानता । सन्दिग्धसाध्यः पक्षः । तथा च एकत्र व्याप्तिप्रकारकं पक्षधर्मताविषयकं वह्निव्याप्यधूमवानयमित्याद्याकारकं लिङ्गज्ञानं अनुमितिकरणमिति पर्यवसितम् । तदेव लिङ्गपरामर्श इत्युच्यते । व्याप्तिमल्लिङ्गम् । तच्च त्रिविधम् । केवलान्वयि, केवलव्यतिरेकि, अन्वयव्यतिरेकि, भेदात् । तत्र केवलान्वयि धर्मसाध्यकं

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

केवलान्वयि । केवलान्वयित्वं च सर्ववृत्तित्वत्। यथा "घटोऽभिधेयः, प्रमेयत्वादि"ति । व्यतिरेकसहचारमात्रग्राहव्याप्तिकं केवलव्यतिरेकि । यथा "पृथिवी इतरेभ्यो भिद्यते, गन्धवत्त्वादि"ति । अन्वयव्यतिरेकोभय-सहचारग्राहव्याप्तिकं अन्वयव्यतिरेकि । यथा "पर्वतो वह्निमान् धूमवत्वात् महानसवदि"ति । एवं त्रिविधमप्यनुमानं प्रत्येकं द्विविधम् — स्वार्थं परार्थं चेति । तत्र स्वानुमितिहेतुः स्वार्थम् । परानुमितिहेतुः परार्थम् । तच्च पञ्चावयवात्मकन्यायवाक्यसाध्यम् । अवयवाश्च स्वावसरे निरूपयिष्यन्ते । अत्र च पूर्वोक्तहेतुत्रयमध्ये अन्वयव्यतिरेकी हेतुः पञ्चरूपोपपन्न एव स्वसाध्यं साधयति । तानि च रूपाणि, पक्षे सत्वं, सपक्षे सत्वं, विपक्षाद्व्यावृत्तिः, अबाधितविषयत्वं, असत्प्रतिपक्षत्वं च । एतानि च रूपाणि धूमवत्त्वहेतौ विद्यन्ते । तत्र पक्षधर्मत्वं निरूपितम् । धूमस्य सपक्षे महानसादौ सत्वात् सपक्षे सत्वम् । सपक्षश्च निश्चितसाध्यः । धूमस्य विपक्षाद्ध्रदादेर्व्यावृत्तिरस्ति । विपक्षश्च साध्याभाववान् । "धूमस्य हेतोर्विषयः साध्यो वन्हिरबाधितः" इत्यबाधितविषयत्वम् । साध्याभाव-साधकं हेत्वन्तरं प्रतिपक्षः । स च धूमहेतोर्नास्त्येवेत्यसत्प्रतिपक्षत्वमप्यस्ति । केवलान्वयिकेवलव्यतिरेकिणौ तु चतूरूपोपपन्नौ एव स्वसाध्यसाधकौ । केवलान्वयिनो विपक्षाभावात्, केवलव्यतिरेकिणस्सपक्षाप्रसिद्धेः । व्याख्यात-मनुमानम् ।

अथोपमानं निरूप्यते — उपमितिप्रमाकरणमुपमानम् । अति-देशवाक्यार्थस्मरणसहकृतसादृश्यविशिष्टपिण्डज्ञानजन्यज्ञानमुपमितिः । सादृ-श्यादिप्रतिपादकवाक्यमतिदेशवाक्यम् । तदर्थस्मरणसहकृतसादृश्यादिविशिष्ट-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पिण्डज्ञानमुपमानम् । तच्च त्रिविधम् — साधर्म्योपमानं, वैधर्म्योपमानं, धर्ममात्रोपमानं च । तत्राद्यं, "यथा गौस्तथा गवय" इति । द्वितीयं तु "अस्मिञ्ज्योतिर्मण्डले यस्तनुप्रकाशो न भवति स चन्द्र" इति वाक्यपूर्वकम् । तृतीयं तु "दीर्घग्रीवः प्रलम्बोष्ठः कठिनकण्टकाशी क्रमेलक" इति वाक्य-पूर्वकम् । इत्युपपादितमुपमानम् ।

अथ शब्दो निरूप्यते । आप्तोक्तत्वम् । आप्तस्तु यथाभूतार्थोप-देष्टा । आकाङ्क्षायोग्यतासन्निधिमत्पदकदम्बकत्वं वा शब्दप्रमाणस्य लक्षणम् । यथा "गामानये"त्यादि । प्रतिपत्तुः जिज्ञासा आकाङ्क्षा । वाक्यार्थाबाधो योग्यता । एकेन पुंसा अविलम्बेनोच्चारणमासत्तिः । एतत्त्रितययुक्तं वाक्यं प्रमाणम् । तच्च द्विविधं – लौकिकं, वैदिकं चेति । तत्राऽऽद्यं, किञ्चिदेव प्रमाणम् । यदाप्तोक्तम् । द्वितीयं, सर्वमपि प्रमाणम् । सर्वस्याऽपि वेदस्य परमाप्तपरमेश्वरप्रणीतत्वात् ।

ननु वेदस्य परमेश्वरप्रणीतत्वे प्रमाणाभावः । तस्यानादित्वेन अपौरुषेयत्वादिति चेन्न, वेदः पौरुषेयः, वाक्यत्वात् भारतवदित्यनुमानेन वेदस्य पौरुषेयत्वसिद्धेः । ननु बाधितमिदमनुमानम् । सोऽयं गकार इति प्रत्यभिज्ञाबलेन सर्वेषां वर्णानां नित्यत्वादिति चेन्न, "उत्पन्नो गकारः, नष्टो गकार" इति प्रतीत्या सर्वेषामपि वर्णानामनित्यत्वे प्रत्यभिज्ञाया जात्यैक्यविषयत्वेन नित्यत्वासाधकत्वात् ।

ननु यत्र वाक्यमपरिपूर्णं तत्र कथमन्वयबोध इति चेत्, तत्र पदान्तर-मध्याहृत्य अन्वयबोधस्वीकारात् । वृत्या पदजन्यपदार्थोपस्थितेरेव शाब्द-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बोधाङ्गत्वात् । वृत्तिश्च शाब्दबोधानुकूलपदार्थोपस्थित्यनुकूलपदपदार्थ-सम्बन्धः । सा च द्विविधा—शक्तिर्लक्षणा चेति । शक्तिश्च "अस्माच्छब्दा-दयमर्थो बोद्धव्य इतीश्वरेच्छा" । सा च वृद्धव्यवहारादिगम्या जात्याकृति-विशिष्टव्यक्तिगोचरा । लक्षणा तु शक्यसम्बन्धः । यथा "गङ्गायां घोषः" इत्यत्र शक्यः प्रवाहः, तत्सम्बन्धः तीरे लक्षणा । इयं च क्वचिदन्वयानुप-पत्त्या, "गङ्गायां घोषः" इत्यादौ । क्वचित्तात्पर्यानुपपत्त्या, "यष्टीः प्रवेशय" इत्यादौ । तात्पर्यज्ञानं च वाक्यार्थबोधे कारणम् । अन्यथा नानार्थश्लिष्ट-लाक्षणिकस्थले विनिगमनानुपपत्तेः । तच्च वाक्यं त्रिविधं — प्रवर्तकं, निवर्तकं, उदासीनं चेति । तत्र कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धीष्ट-साधनताबोधक" लिङ्लोट्तव्य "प्रत्ययादिसहितं प्रवर्तकम् । यथा घटमानय, यजेते"त्यादि । नञ्समभिव्याहृतमीदृशमेव वाक्यं निवर्तकम् । "न कलञ्जं भक्षयेत् न सर्पायाङ्गुलिं दद्यादि"त्यादि । तृतीयं तु "लोष्टतृणादिकमस्ती"-त्यादिरूपम् ।

शक्ताश्च शब्दाः चतुर्विधाः — यौगिकाः, रूढाः, योगरूढाः, संज्ञाशब्दाश्चेति । तत्राद्याः पाचकयाचकादयः । द्वितीयास्तु घटाश्वकर्णादयः । योगरूढास्तु पङ्कजादिशब्दाः । तुरीयास्तु डित्थादिशब्दाः । **लाक्षणिकाश्चाष्ट-विधाः** — जहल्लक्षणाकाः, अजहल्लक्षणाकाः, जहदजहल्लक्षणाकाः, लक्षित-लक्षणाकाः, निरूढलाक्षणिकाः, रूढिपूर्वकलाक्षणिकाः, विरोधिलाक्षणिकाः, पर्युदासलाक्षणिकाः । क्रमेणोदाहरणानि — "गङ्गायां घोष"ः, "छत्रिणो यान्ति", "सोऽयं देवदत्तः", द्विरेफं पश्य", "घटं करोति", "मण्डपं भोजय", विषं भुङ्क्ष्व", "अब्राह्मणमानय" इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

देवदत्तः पचतीत्यादौ आख्यातस्य यत्न एवार्थः । पचतीत्यस्य पाकं करोतीति यत्नार्थककरोतिना विवरणात् । रथो गच्छतीत्यादौ तु व्यापारे लक्षणा । लाघवेन यत्नस्यैव आख्यातशक्यतावच्छेदकत्वात् । कर्तुश्चाक्षेपालाभः । उपसर्गाश्च प्रजयतीत्यादौ द्योतकाः, न वाचकाः । तात्पर्यग्रहार्थमपेक्ष्यते । निपातास्तु वाचकाः । स्वातन्त्र्येणार्थप्रत्यायकत्वात् । उपसर्गाणां तु धातुसमभिव्याहारेणैवार्थबोधकत्वात्, बहुत्वात्, धातोरेकत्वेन तत्रैव शक्तिकल्पनौचित्यादिति । सिद्धं चत्वार्यत्र प्रमाणानीति ।

ननु प्रत्यक्षव्यतिरिक्तस्य प्रामाण्यं न सम्भवति । अनुमानस्य व्याप्तिग्रहाधीनत्वेन, व्याप्तिग्रहस्य चायोग्योपाधिशङ्काधीनव्याभिचारशङ्काकलङ्कितया असम्भवेन, तदधीनानुमानाप्रवृत्तौ; व्यवहाराधीनशक्तिग्रहासम्भवेन, शब्दाप्रवृत्तौ; अतिदेशवाक्याधीनस्य उपमानस्याप्यप्रवृत्तेः । अतो नाप्रत्यक्षं प्रमाणमिति चेन्न, कोटिस्मरणाद्यभावेन व्याभिचारशङ्कानावश्यकतया व्याप्तिग्रहसम्भवेन अनुमानप्रामाण्यसम्भवे, तन्मूलकयोः शब्दोपमानयोः अपि प्रामाण्यस्य निष्प्रत्यूहत्वात् । कथमन्यथा परोप्यप्रामाण्यं साधयेत् ।

ननु अथाप्युपमानस्य पार्थक्येन प्रामाण्ये मानाभावः । अनुमानएवान्तर्भावसम्भवात् । तथाहि — "गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् । असति वृत्यन्तरे तत्र प्रयुज्यमानत्वात्" । इत्यनुमानेन वाच्यवाचकभावसम्बन्धज्ञानसम्भवात्, अतिदेशवाक्येन वा तद्ग्रहसम्भवादिति चेत्, गवयत्ववाचकत्वस्य साध्यस्य पूर्वमप्रसिद्धत्वेन अनुमानासम्भवात् । सादृश्यस्याप्रवृत्तिनिमित्तत्वेनातिदेशवाक्येन तद्ग्रहासम्भवात् च ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नन्वेवमपि शब्दस्य पृथक्प्रामाण्यं किमर्थमङ्गीकर्तव्यम् ? अनुमानविधयैव बोधकत्वसम्भवात्। तथाहि — "इमानि पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बकत्वादि"ति वा, "एते पदार्थाः तात्पर्यविषयपरस्परसंसर्गवन्तः, आकाङ्क्षादिमत्पदस्मारितत्वादि"त्यनुमानेन वा संसर्गबोधसम्भवादिति चेन्न, अनुमानादिवत् फलवैजात्यस्यानुभवसिद्धत्वेन शब्दस्यापि पार्थक्येन प्रामाण्यावश्यंभावात्। किंच, यादृशं शब्दात्प्रवर्तकं ज्ञानमिष्यते न तादृशमनुमानेन। पदपक्षकानुमाने पदानामेव विशेष्यत्वात्। पदार्थपक्षकानुमाने पदार्थानामेव विशेष्यत्वात्। संसर्गस्योभयत्रापि प्रकारत्वात्। शाब्दबोधस्तु घटादिकर्मकानयनक्रियाकसंसर्गविषयक इति महद्वैलक्षण्यम्। किंच, व्याप्त्यादिप्रतिसन्धानं विनापि वाक्यार्थबोधस्य सर्वानुभवसिद्धत्वेन पृथक्प्रामाण्यमवश्यमङ्गीकर्तव्यमेवेति दिक्।

चेष्टायाश्शब्देऽन्तर्भावः। अर्थापत्तेर्व्यतिरेक्यनुमानेनैवान्यथासिद्धिः। अनुपलब्धेश्च प्रत्यक्षप्रमाणसहकारित्वमैतिह्यं च शब्देऽन्तर्गतम्। सम्भवस्त्वनुमानेऽन्तर्भूत इति सुष्ठूक्तं चत्वार्येव प्रमाणानीति। एतेषां प्रमाणानां प्रमानिष्ठप्रमात्वमनुमानेनैव गृह्यते। विवादाध्यासितं जलादिज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वादित्यादिना। न स्वतो गृह्यते अनभ्यासदशायां संशयानुपपत्तेः। इति प्रमाणनिरूपणम्।

अथ प्रमेयं निरूप्यते। प्रमेयं द्वादशविधम्। तथा च सूत्रम् — "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः" प्रमेयमिति। तत्राऽऽत्मत्वसामान्यवानात्मा। स च देहेन्द्रियमनःप्राणव्यतिरिक्तः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

युगपत्कालीनशरीरभेदेन भिन्नः व्यापी नित्यः अहमितिमानसप्रत्यक्षविषयः । विप्रतिपत्तौ तु बुध्यादिगुणैरनुमेयः । तस्याऽऽत्मनो भोगायतनं शरीरं, चेष्टाश्रयो वा । चेष्टा हिताऽहितप्राप्तिपरिहारार्थः स्पन्दः । शरीरसंयुक्तं ज्ञानकरणं अतीन्द्रियमिन्द्रियं, प्रत्यक्षज्ञानकरणं वा । तानि चेन्द्रियाणि घ्राण-रसनचक्षुःश्रोत्रत्वङ्मनांसीति षट् । अर्थाः षट् पदार्थाः द्रव्यगुणकर्मसामान्य-विशेषसमवायाः । अभावः सप्तमः ।

तत्र समवायिकारणं द्रव्यम् । तानि च द्रव्याणि नव । पृथिव्यप्तेजो-वाय्वाकाशकालदिगात्ममनांसीति । तत्र पृथिवी गन्धवती । सा च घ्राणशरीरमृत्पाषाणवृक्षाद्यनेकप्रकारा । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसं-योगविभागपरत्वाऽपरत्वगुरुत्वद्रवत्वसंस्काररूपचतुर्दशगुणवती । शीतस्पर्शवत्य-आपः । रसनेन्द्रियसरित्समुद्रहिमकरकावरुणलोकशरीरादिरूपाः गन्धवर्ज-स्नेहयुक्तपूर्वोक्तगुणवत्यः । उष्णस्पर्शवत्तेजः । चक्षुरिन्द्रियादित्यादिशरीर-वह्न्यादिरूपम् । तच्चतुर्विधम् दिव्यं, भौमं, औदर्यं आकरजं चेति । दिव्यं विद्युदादि । भौमं वह्न्यादि । औदर्यं जाठरोऽग्निः । आकरजं सुवर्णादि । स्नेहगन्धरसगुरुत्ववर्जपूर्वोक्तैकादशगुणवत् । रूपरहितस्पर्श-वान्वायुः । त्वगिन्द्रियवायुलोकशरीरप्राणबाह्यवातादिरूपः । शरीरान्तस्स-ञ्चारी वायुः प्राणः । रूपद्रवत्ववर्जपूर्वोक्तनवगुणवान् । स सर्वोऽप्यतीन्द्रियः । स चैकोऽपि उपाधिभेदेन प्राणापानादिसंज्ञां लभते ।

अत्र पृथिव्यादयश्चत्वारः प्रत्येकं द्विविधाः । नित्याऽनित्यभेदात् । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । तत्र पृथिव्यादीनामुत्पत्ति-विनाशक्रमः कथ्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्रेश्वरस्य सिसृक्षायां सत्यां प्राण्यदृष्टवशात् द्वयोः परमाण्वोः क्रियया संयोगे सति द्व्यणुकमुत्पद्यते। त्रिभिः द्व्यणुकैः त्र्यणुकमारभ्यते। त्र्यणुकैश्चतुरणकं, ततस्स्थूलं, स्थूलतरं, स्थूलतमं महापृथिवी, महत्य आपः, महत्तेजः, महान्वायुरुत्पद्यते। तथा सञ्जिहीर्षायां सत्यां जीवादृष्टवशात् द्वयोः परमाण्वोः क्रियया विभागे द्व्यणुकं नश्यति। ततस्त्र्यणुकचतुरणकादिनाशात्स्थूलपृथिव्यादिनाशः।

शब्दगुणकमाकाशम्। तच्च विभु नित्यम्। संख्यादिपञ्चकशब्दगुणवत्। अतीतादिव्यवहारहेतुः कालः। सचैको विभुर्नित्यश्च, प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च। ज्ञानाधिकरणमात्मा। स च द्वेधा — जीवात्मा, परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा। एको विभुर्नित्यश्च संख्यादिपञ्चकनित्यज्ञानेच्छाकृतिमान्। जीवश्च बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मभावनाख्यसंस्कारसंख्यादिपञ्चकगुणवान्। सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्चाऽणु, प्रत्यात्मं भिन्नम्; नित्यं च संख्यादिसप्तकवेगवत्। **द्रव्याणि निरूपितानि।**

गुणा निरूप्यन्ते। सामान्यवानसमवायिकारणं, अस्पन्दात्मा गुणः। स चतुर्विंशतिविधः — रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मसंस्कारभेदात्। तत्र रूपं चक्षुर्मात्रग्राह्यो गुणः। तच्च शुक्लनीलपीतरक्तहरितकपिशश्यामभेदात्सप्तविधम्। पृथिव्यांदित्रयवृत्ति, पृथिव्यामेव सप्तविधम्। शुक्लभास्वरं तेजसि। शुक्लमभास्वरमप्सु। रसनग्राह्यो गुणो रसः। स च मधुरादिभेदात् षड्विधः पृथिव्यामेव, अप्सु मधुर एव। घ्राणग्राह्यो गुणो

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गन्धः। स द्विविधः सुरभिअसुरभिभेदात्। पृथिवीमात्रवृत्तिः। त्वगिन्द्रियग्राह्यो गुणस्स्पर्शः। स च त्रिविधः — शीतोष्णानुष्णाशीतभेदात्। पृथिव्यादिचतुष्टयवृत्तिः। शीतः पयसि, उष्णस्तेजसि, अनुष्णाशीतः पृथिवीवाय्वोः। एते चत्वारः पृथिव्यां पाकजनिता अनित्याः अन्यत्रापाकजाः। नित्याऽनित्याश्च। नित्यगता नित्याः, अनित्यगताः अनित्याः।

एकादिव्यवहारहेतुः संख्या, सर्वद्रव्यवृत्तिः, एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यगतं नित्यं, अनित्यगतमनित्यम्। द्वित्वदिकं तु अनित्यम्। मानव्यवहारासाधारणकारणं परिमाणम्। सर्वद्रव्यवृत्ति। तच्चतुर्विधं — अणु महत् दीर्घं ह्रस्वं चेति। पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति। संयुक्तव्यवहारहेतुस्संयोगः, सर्वद्रव्यवृत्तिः। संयोगनाशको गुणः विभागः सर्वद्रव्यवृत्तिः। परापरव्यवहारासाधारणकारणे परत्वापरत्वे। ते च द्विविधे दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वं, कनिष्ठे अपरत्वम्। आद्यपतनासमवयिकारणं गुरुत्वम्। पृथिवीजलवृत्ति। आद्यस्यन्दनासमवयिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद्द्विविधं — सांसिद्धिकं, नैमित्तिकमिति। आद्यं जले, अन्यद्भूतेजसोः। चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः जलमात्रवृत्तिः। श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः — वर्णात्मको, ध्वन्यात्मकश्चेति। वर्णात्मकस्संस्कृतभाषादिरूपः, सर्वव्यवहारहेतुः। ध्वन्यात्मको भेर्यादौ। बुद्धिर्ज्ञानम्। सा च द्विविधा — स्मृतिरनुभवश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स च द्विविधः — यथार्थोऽयथार्थश्चेति। सर्वैरनुकूलतया वेदनीयं सुखम्। प्रतिकूलतया वेदनीयं दुःखम्। रागः इच्छा।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

क्रोधो द्वेषः। कृतिः प्रयत्नः। विहितकर्मजन्यो धर्मः। निषिद्धकर्मजन्योऽधर्मः। संस्कारस्त्रिविधः — वेगो भावना स्थितस्थापकश्चेति। वेगः पृथिव्यादि-चतुष्टयमनोवृत्तिः। अनुभवजन्यः स्मृतिहेतुर्भावना, आत्ममात्रवृत्तिः। अन्यथा-भूतस्य वस्तुनः पुनस्तादवस्थ्यापादकस्स्थितस्थापकः, पृथिवीमात्रवृत्तिः। गुणा-उक्ताः।

कर्मोच्यते। चलनात्मकं कर्म। तच्च उत्क्षेपणावक्षेपणाकुञ्चन-प्रसारणगमनभेदात्पञ्चधा। अनुवृत्तिप्रत्ययहेतुस्सामान्यम्। तच्च द्विविधं — परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि। नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः। अयुतसिद्धयोः सम्बन्धस्समवायः। ययोर्मध्ये एकमपराश्रितमेवाऽवतिष्ठते तावयुतसिद्धौ। यथा — अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ। जातिव्यक्ती, विशेषनित्यद्रव्ये च। अभावो द्विविधः — अन्योन्याभावस्संसर्गा-भावश्चेति। तादात्म्यावच्छिन्नप्रतियोगिताको अभावो अन्योन्याभावः। यथा घटस्य पटाद्भेदः। इतरस्त्रिविधः — प्रागभावः, प्रध्वंसः, अत्यन्ताभावश्चेति। विनाश्यभावः प्रागभावः। यथा घटस्योत्पत्तेः प्राक् कपालेष्वभावः। जन्योऽभावः प्रध्वंसः। उत्पन्नस्य कपालेषु मुद्गरप्रहारादिजन्यः। अनाद्यन्तो अभावो अत्यन्ताभावः। यथा भूतले घटाभावः। अर्था उक्ताः। बुद्धिमनसी निरूपिते। प्रवृत्तिः, धर्माऽधर्मौ, दोषो, रागद्वेषमोहाः।

मृत्वा पुनरुत्पत्तिः प्रेत्यभावः। फलमिष्टम्। पीडा दुःखम्। आत्यन्तिकैकविंशतिदुःखध्वंसो मोक्षः। स्वसमानाधिकरणदुःखप्रागभावास-मानकालीनत्वमात्यन्तिकत्वम्। प्रमेयं निरूपितम्।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एकस्मिन्धर्मिणि विरुद्धनानाकोटिकं ज्ञानं संशयः। स त्रिविधः – साधारणधर्मदर्शनजः, असाधारणधर्मदर्शनजः, विप्रतिपत्तिजः इति। तत्राद्यः स्थाणुर्वा पुरुषोवेति। द्वितीयः भूर्गन्धवत्वान्नित्या अनित्या चेति। तृतीयो यथा – नित्यश्शब्दः अनित्यश्शब्द इति विरुद्ध-वादिद्वयवाक्याभ्यां मध्यस्थस्य संशयः नित्यश्शब्दः अनित्यो वेति। येन प्रयुक्तः पुरुषः प्रवर्तते तत्प्रयोजनम्। तच्च सुखदुःखाभावश्च। वादिप्रतिवादिनोः सम्प्रतिपत्तिविषयोऽर्थो दृष्टान्तः। स द्विविधः – साधर्म्यदृष्टान्तः वैधर्म्यदृष्टान्तश्चेति। तत्राद्यो यथा वन्ह्यनुमाने महानसादिः। द्वितीयस्तत्र ह्रदः। प्रामाणिकत्वेनाभ्युपगतः अर्थस्सिद्धान्तः। स चतुर्विधः – सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तभेदात्। तत्र प्रथमो यथा – सर्वत्र धर्मिसद्भावः। द्वितीयो यथा नैयायिकस्य मन-इन्द्रियम्। तृतीयो यथा – ईश्वरे सिद्धे, तस्य सार्वज्ञ्यादिसिद्धिः। चतुर्थो यथा – जैमिनीयस्य नित्यानित्यविचारो यथा तथा वा भवतु। शब्दस्तावद्गुण इति। अनुमानवाक्यैकदेशा अवयवाः। तथा च सूत्रम् – "प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि अवयवाः" इति। यथा पर्वतो वन्हिमानिति प्रतिज्ञा, धूमवत्वादिति हेतुः, यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्युदाहरणं, तथाचायमित्युपनयः, तस्मात्तथेति निगमनम्। अनुमानप्रतिपादकन्यायवाक्यैकदेशत्वादवयवा इवावयवाः। व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वन्हिर्न स्यात्तर्हि धूमोऽपि न स्यादित्यादिः। निर्णयोऽवधारणज्ञानम्। स द्विविधः – यथार्थोऽय-थार्थश्चेति। तत्राद्यः, प्रत्यक्षप्रमादिरूपः। द्वितीयः, तस्मिंस्तद्ग्रहः।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा शुक्ताविदं रजतमित्यादिज्ञानम् । तत्त्वबुभुत्सोः कथा वादः । कथा च नानाकर्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः । यथा शिष्यस्याऽऽचार्येण संवादः । विजिगीषुकथा जल्पः । यथा वादिनः प्रतिवादिना । स्वपक्षस्थापनहीना परपक्षदूषणमात्रपर्यवसाना कथा वितण्डा । नाऽस्य वैतण्डिकस्य स्थाप्यः पक्षोऽस्ति । यथा "शब्दो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादि"त्यत्र, "शब्दो न द्रव्यं, गुणाश्रयत्वाभावादि"त्युक्ते इष्टापत्तिरिति ।

हेतुलक्षणरहिताः हेतुवदवभासमाना हेत्वाभासाः । ते च पञ्चविधाः - असिद्ध,विरुद्धा,नैकान्तिक,प्रकरणसम,कालात्ययापदिष्ट,भेदात् । तत्र व्याप्तस्य पक्षधर्मतया प्रतीतिस्सिद्धिः । तदभाववानसिद्धः । स त्रिविधः - आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति । तत्राश्रयासिद्धो यथा - "गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत्" । अत्र हि गगनारविन्दमाश्रयः । तस्यासिद्धत्वादाश्रयासिद्धः । स्वरूपासिद्धो यथा - अनित्यश्शब्दः, चाक्षुषत्वादिति । अत्र हि चाक्षुषत्वं हेतुः । तत् पक्षेऽसिद्धम् । व्याप्यत्वासिद्धो द्विविधः - एको व्याप्तिग्राहकप्रमाणाभावात् । अपरस्तूपाधिसद्भावात् । तत्राद्यो यथा — यत् सत् तत् क्षणिकं, यथा जलधरपटलः, सन्तश्चामी भावा इति । इतरो यथा — क्रत्वन्तर्वर्तिनी हिंसा अधर्मसाधिका, हिंसात्वात्, बाह्यहिंसावदिति । अत्र निषिद्धत्वमुपाधिः । उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः । असङ्कीर्णोदाहरणं तु व्यर्थविशेषणो, नीलधूमादिः । साध्यासहचरितो विरुद्धः यथा नित्यः शब्दः, कृतकत्वादिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अनैकान्तिकस्त्रिविधः — साधारणासाधारणानुपसंहारिभेदात् । तत्र विपक्षवृत्तिस्साधारणः । यथा घटो नित्यः, प्रमेयत्वादिति । सर्वसपक्षव्यावृत्तोऽसाधारणः । यथा भूर्नित्या, गन्धवत्त्वादिति । सपक्षविपक्षरहितोऽनुपसंहारी । यथा, सर्वं क्षणिकं, सत्त्वादिति । साध्यविपरीतसाधकहेत्वन्तरयुक्तः प्रकरणसमः । यथा — अनित्यश्शब्दः, कृतकत्वात् । नित्यश्शब्दः, श्रावणत्वात् शब्दत्ववदिति । अयमेव "सत्प्रतिपक्ष" इत्युच्यते । पक्षे प्रमाणान्तरावधृतसाध्याभावो हेतुः कालात्ययापदिष्टः । यथा, वह्निरनुष्णः, कृतकत्वात् । अत्र पक्षे वह्नौ अनुष्णत्वाभावस्य प्रत्यक्षेणावधारणात् । अयमेव "बाधित" इत्युच्यते । अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरं परिकल्प्य दूषणाभिधानं छलम् । यथा, नवकम्बलः अयमिति नूतनाभिप्रायेण प्रयुक्ते, कश्चिद्दूषयति नास्य नव कम्बलास्सन्ति, दरिद्रत्वात्, नह्यस्य कम्बलद्वयमपि सम्भवतीति वादी छलेन जीयते । असदुत्तरं जातिः । सा चोत्कर्षसमादिभेदेन बहुविधा । अनित्यश्शब्दः, कृतकत्वात्, घटवत् इत्यत्र तद्वदेवास्य मूर्तत्वमपि स्यादित्युत्कर्षसमा जातिः । पराजयहेतुर्निग्रहस्थानम् । तच्च न्यूनाधिकादिभेदाद्बहुविधम् । एतेषां षोडशपदार्थानां तत्त्वज्ञानादेकविंशतिदुःखध्वंसात्मकमोक्षप्राप्तिरिति सिद्धम् ।

इति सर्वदर्शनसिद्धान्तसङ्ग्रहे न्यायमतसिद्धान्तसङ्ग्रहः समाप्तः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ वैशेषिकमतं लिख्यते ॥

तन्मते पदार्थाः षट् । तेषां तत्त्वज्ञानान्मोक्षप्राप्तिः । तथा च सूत्रम् – "अर्थाः षट् पदार्थाः । साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतु"रिति । षट् पदार्थाश्च द्रव्यगुणकर्मसामान्यविशेषसमवायाः । ते च पूर्वं न्यायतन्त्रे निरूपिताः । इतरेऽपि पदार्थाः एतेष्वेवान्तर्भूता-इति न पृथङ्निरूप्यन्ते । तत्र पृथिव्यादीनां साधर्म्येण वैधर्म्येण च ज्ञानं तत्त्वज्ञानम् । द्रव्यत्वस्य जलादिसाधारणधर्मत्वात्, गुणादिव्या-वृत्तधर्मत्वाच्च तदुभयाकारेण पृथिव्यादिज्ञानमावश्यकम् । तथाऽऽत्मत्वस्य सजातीयानुगतत्वात्, घटादिव्यावृत्तत्वाच्च, तदुभयाकारेण आत्मतत्त्व-ज्ञानं मोक्षसाधनम् । स चात्मजीवेशभेदाद्विविधः । तत्र जीवाः देव-तिर्यङ्मनुष्यादिभेदाद्बहुविधाः । ईशस्तु एक एव सर्वज्ञः; नित्यज्ञाने-च्छाकृतिमान् । तदाज्ञाभूतश्रुतिस्मृतीतिहासपुराणाद्युपदिष्टाः क्रियाः कुर्वन्, तद्भक्त्याऽऽर्जिततत्प्रसादाज्जीवो मुच्यते । मोक्षश्च करणोपरमादात्म-नस्तूष्णीं अवस्थितिः । सुखं च दुःखानुषक्तत्वात् दुःखमेव मधुविष-संपृक्तान्नभोजनवत् । तदुच्छेदोऽपि दुःखोच्छेदवत् पुरुषार्थ एव । एतन्मते च **प्रमाणं द्विविधं** – प्रत्यक्षमनुमानं च । शब्दश्चानु-मानविधया बोधकः । अनुमानप्रकारश्च न्यायमत एवोक्तः । ईश्वर-सिद्धिश्च – "क्षित्यादिकं सकर्तृकं, कार्यत्वात् घटवत्" इत्यनुमानात् । आगमादपि तदभ्युपगतप्रकारादिति । उपमानं च नास्त्येव । शक्ति-ग्रहस्य व्यवहारादिभिरेव सिद्धेः ॥

इति श्रीषड्दर्शनीसिद्धान्तसङ्ग्रहे वैशेषिकमतसिद्धान्तसङ्ग्रहः समाप्तः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ मीमांसकमतं लिख्यते ॥

तच्च द्विविधम् — भट्टमतं, प्राभाकरमतं चेति । तत्र पूर्वं भट्टमतं लिख्यते — कलियुगादौ बौद्धादिभिः खिलीकृतं वेदमार्गमवलोक्य जगदुज्जीवयितुं परमकारुणिकः कुमारस्वामी, भट्टाचार्यरूपेणावतीर्य बौद्धान्निरस्य पुनः श्रुतिमार्गं प्रतिष्ठापयामासेति प्रसिद्धम् । तत्र प्रतिपाद्यो विषयस्तु धर्मः, अधर्मश्च । धर्मस्य च साधनं कर्म, नित्यनैमित्तिककाम्यभेदात्त्रिविधम् । अधर्मस्य तु प्रतिषिद्धम् । नित्यनैमित्तिकानुष्ठानात् प्रत्यवायपरिहारः फलम् । काम्यानुष्ठानात् स्वर्गपशुपुत्रादयः । निषिद्धाच्च प्रत्यवायः । काम्यनिषिद्धवर्जं निष्कामानुष्ठितैः मोक्षप्राप्तिः परमफलम् । तथा च सूत्रम् — "अथातो धर्मजिज्ञासे"ति । अस्यार्थः — साङ्गस्वाध्यायाध्ययनानन्तरं, तस्मादेव हेतोः प्रमाणस्वरूपसाधनफलैः साभासैर्धर्मो विचार्य इति ।

धर्मश्च चोदनैकप्रमाणकः । अधर्मश्च निषेधैकप्रमाणकः । तथाहि— न तावत्तत्र प्रत्यक्षं प्रमाणम् । धर्माधर्मयोरतीन्द्रियत्वात् । नाप्यनुमानं, तद्व्याप्यलिङ्गाभावात् । न च "देवदत्तशरीरं देवदत्तविशेषगुणजन्यं, कार्यत्वे सति देवदत्तभोगसाधनत्वात् । देवदत्तनिर्मितस्रग्वत्" इत्यनुमानात्तत्सिद्धिरिति वाच्यम् । तस्य सामान्यविषयकत्वेनानुष्ठानानुपयोगित्वात् । नाप्युपमानं, तस्य सङ्केतैकविषयत्वात् । नाप्यर्थापत्तिः तस्या अप्यनुमानवत् सामान्यमात्रविषयत्वेनानुष्ठानानुपयोगित्वात् । नाप्यनुपलब्धिः, तस्या अभावैकविषयत्वात् । तस्माच्चोदनैव तत्र प्रमाणमिति ।

अलौकिकश्रेयस्साधनं वा धर्मः । अलौकिकत्वं च लोकप्रमाणानवगतत्वम् । तच्च पूर्वमेवोक्तम् । चोदना च वेदैकदेशः लिङ्, लोट्, तव्य,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रत्ययादिरूपः । वेदश्चापौरुषेयश्शब्दसमुदायः । स चतुर्धा — विध्य,र्थवाद, मन्त्र, नामधेय,भेदात् । विधिरुक्तः । अर्थवादश्च विहितप्रशंसकः । निषिद्ध-निन्दकश्च । अनुष्ठेयार्थप्रकाशको मन्त्रः । यज्यादिसमानाधिकरणस्सुबन्तो नामधेयम् । अतस्समस्तोऽपि वेदो धर्माधर्मयोः प्रमाणम् ।

ननु वेदस्य प्रामाण्ये सति सर्वमिदं संगच्छते । तदेव न सम्भवति । तथाहि — वेदो न प्रमाणम्, वाक्यत्वात्, भूमिकाधारवाक्यवत् । अपि च, प्रामाण्यप्रयोजकस्याप्तोक्तत्वस्याभावादिति चेन्न, वाक्यत्वस्य प्रमाणवाक्येऽपि सत्वेन व्यभिचारात् । आप्तोक्तत्वस्य चेह प्रामाण्याप्रयोजकत्वात् । अपौरुषेयत्वे न निर्दोषतया प्रामाण्यस्वीकारात् ।

ननु अपौरुषेयत्वमसिद्धम् । वेदः पौरुषेयः, वाक्यत्वात्, भारतवदिति चेन्न, पौरुषेयत्वे भ्रमप्रमादादिदोषमूलत्वशङ्कयाऽप्रामाण्यापातात् । न च निर्दोषपुरुषप्रणीततया प्रामाण्यम्, तदपेक्षया निर्दोषत्वस्यैव लाघवेन प्रामाण्य-प्रयोजकत्वात् । काठकादिसमाख्यायाश्च प्रवचननिमित्तत्वात् । स एवायं गकार इति प्रत्यभिज्ञाबलेन वर्णमात्रस्य नित्यत्वसिद्धेश्च । उत्पादादिप्रतीतेश्च व्यञ्जकवाय्वादिविषयत्वात् । पदपदार्थसम्बन्धस्य चौत्पत्तिकत्वेन तत्प्रयुक्ततया पौरुषेयत्वस्यानाशङ्कनीयत्वात् । **तस्माद्वेदो धर्मे प्रमाणमिति सिद्धम् ।**

प्रमाणं चानधिगतार्थगमकम् । तच्च षड्विधम् — प्रत्यक्षा,नुमानो,पमान,शब्दा,र्थापत्य,नुपलब्धि, भेदात् । तज्जन्या प्रतीतिरपि षड्विधा । तद्विषयाश्च द्रव्यगुणकर्मसामान्यसमवायाभावाः । द्रव्याणि च पृथिव्यादीनि । अन्धकारोऽपि द्रव्यम् । "नीलं तमः", "तमश्चलती"त्यादिप्रतीतेः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बाधकाभावेन प्रमात्वात्। शब्दोऽपि द्रव्यं, स्वातन्त्र्येण प्रतीतेः। विभुश्च, सर्वत्र युगपदुपलब्धेः। वीचीतरङ्गकदम्बमुकुलन्यायकल्पनायाश्चाप्रमाणिकत्वात्। वायुश्च नानुमेयः, किन्तु त्वगिन्द्रियजन्यप्रत्यक्षविषयः। "शीतो वायुर्वाती"ति प्रतीतेः। मनो नाणु, किन्तु विभु। सर्वाङ्गीणसुखाद्युपलब्धेः। इत्यादयो विशेषाः।

प्रत्यक्षादिजन्या प्रतीतिरपि पृथक् द्विविधा — प्रमितिः भ्रान्तिश्चेति। सा चातीन्द्रियाऽपि ज्ञाततालिङ्गानुमेया। तथाहि — "अयं घटः" इति ज्ञानानन्तरं, "मया ज्ञातो घट" इति व्यवहारात्। घटादौ ज्ञातताख्यः प्राकट्यापरपर्यायः कश्चन धर्म उत्पद्यते। स चान्वयव्यतिरेकाभ्यां ज्ञानजन्यः। तेन च धर्मेण ज्ञानमनुमीयते। यथा — "घटः घटत्वप्रकारकघटविशेष्यकज्ञानविषयः, तादृशज्ञातताववत्वात्, घटान्तरवत्"। अनेन चानुमानेन ज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यत इति स्वतस्त्वं प्रमाणस्य। विषयतासम्बन्धेनार्थतथात्वस्यैव प्रामाण्यरूपत्वात्।

न च संशयानुपपत्तिः। निश्चितेऽपि संशयस्य दोषवशादुपपत्तेः। अप्रामाण्यं च परतः। तदभावघटिताप्रामाण्यस्य ज्ञानगोचरत्वासंभवात्। एवं च वेदानामप्युक्तप्रामाण्यशालिज्ञानजनकतया प्रमाणशिरोमणित्वम्।

तत्र विधिस्तावत्साक्षाद्धर्मे प्रमाणम्। अर्थवादानां तु तदपेक्षितप्राशस्त्यसमर्पकतया प्रामाण्यम्। मन्त्राणां तु अनुष्ठेयार्थप्रकाशनद्वारा

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धर्मप्रमितावुपयोगात् प्रामाण्यम् । नामधेयानां च सङ्कल्पव्यवहारादि-द्वारा धर्मप्रमित्युपयोगित्वेन प्रामाण्यम् । स्मृतीतिहासपुराणादीनां, कल्पसूत्रव्याकरणादीनां च तन्मूलकतयैव प्रामाण्यम् । न तु तद्वि-रोधिनामन्यमूलकानामपि प्रामाण्यम् । लोकवेदयोश्च पदपदार्थानन्यत्वम् । शब्दार्थश्चाकृतिरेव, लाघवात् । न तु व्यक्तिः, आनन्त्याद्व्यभिचाराच्च । विशिष्टशक्तौ च गौरवात् । व्यक्तेश्चाक्षेपाल्लक्षणया वा लाभः । अविगीतश्च शिष्टाचारो धर्मे प्रमाणम् । उद्भिदादिपदानि च यौगिक-वाक्यभेदतत्प्रख्यतद्व्यपदेशैः कर्मनामधेयानीति सिद्धं समस्तस्याऽपि वेदस्य धर्मे प्रामाण्यम् । स च धर्मो भावार्थादेव निष्पद्यते । तच्च प्रामाण्यं द्विविधं – बोधकत्वमनुष्ठापकत्वं चेति । तत्रा-नुष्ठापकत्वं भावनाज्ञानाधीनमित्यतो भावना निरूप्यते ।

भवितुः प्रयोजको व्यापारो भावना । सा च द्विविधा – शब्दभावना, अर्थभावना चेति । शब्दभावना च शब्दनिष्ठः प्रवर्तनापरपर्यायः प्रवृत्त्यनुकूलो व्यापारविशेषः । "अश्वमानय," "गां आनये"त्यादिलौकिकवाक्येषु राजगुर्वादेरिव वेदे वक्तुरभावेन लिङादेरेव तत्स्थानाभिषिक्ततया, "लिङादिरेव मां प्रवर्तयतीत्यनुभवसाक्षिकः । सा च शब्दभावना, कर्मकरणेतिकर्तव्यतारूपांशत्रयवती । तत्र कर्म पुरुष-प्रवृत्तिः । करणं सङ्केतज्ञानम् । इतिकर्तव्यता च प्ररोचना । तदुक्तम् –

"लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते" ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इति। उक्तं च –

“अभिधाभावनामाहुः अन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः ॥

इति। अर्थभावनाप्यंशत्रयवती । तस्यां च धात्वर्थः करणम् । पुरुषार्थस्स्वर्गादिर्भाव्यः । तत्प्रकरणाम्नातमन्यन्वाधानादिकमितिकर्तव्यता । नचैवमपि लिङादिभिः कथं धर्मप्रमितिरिति वाच्यं, शब्दतस्तत्प्रतीत्यभावेऽपि तन्मूलकार्थापत्या तत्प्रतीत्युपपत्तेः। वेदवाक्याद्यागस्य स्वर्गसाधनत्वमवगतम् । स्वर्गश्च कालान्तरदेशान्तरदेहान्तरभावी ! यागश्चाशुतरविनाशी । तस्य च तादृशस्वर्गसाधनत्वं तावत्पर्यन्तस्थायिनं स्वजन्यं व्यापारमन्तरा न सम्भवतीति तादृशव्यापारः कश्चन परिकल्प्यते। स एव चापूर्वमिति धर्म इति च गीयते।

नन्वेवमपि नाऽपूर्वसिद्धिः । तृप्त एवेत्यादिवाक्यैः देवताप्रीतेरेव द्वारत्वावगमादिति चेन्न, प्रीतेः क्षणिकत्वात् फलव्यधिकरणत्वात् देवताप्रीतेः सर्वत्रासम्भवाच्च । नन्वेवमपि यागध्वंसस्यैव व्यापारत्वमुचितम्, “धर्मिकल्पनातो लघीयसी धर्मकल्पने”ति न्यायादिति चेन्न, प्रतियोगितदभावयोरेकत्राऽजनकत्वात् । तथात्वे कारणीभूताभावप्रतियोगित्वेन यागस्य प्रतिबन्धकत्वापातात् । ध्वंसस्य नित्यत्वेन “धर्मः क्षरति कीर्तनादि”ति वाक्यप्रतिपन्नकीर्तननाश्यत्वानुपपत्तेश्च । तस्माद्धात्वर्थजन्यः फलपर्यन्तस्थायीभावरूपः कश्चन धर्मोऽस्तीति सिद्धम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्साधनं च कर्म शव्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयरूप-भेदकप्रमाणानुसारात् यागदानहोमादिरूपेण भिद्यते। तत्र च द्रव्यदेवतादिक-मङ्गभावं भजते। तत्र च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याः प्रमाणम्। श्रुतिर्द्वितीयादिः। लिङ्गं सामर्थ्यम्। वाक्यं पदान्तरसमभिव्याहारः। प्रकरणं परस्पराकाङ्क्षा। स्थानं सादेश्यम्। समाख्या यौगिकी संज्ञा। श्रुतिलिङ्गादिषु च पूर्वं पूर्वं वलीयः। एतैः प्रमाणैरवगतोऽङ्गाङ्गिभाव एव शेषशेषिभाव इत्युच्यते। शेषी च शेषस्य प्रयोजकः। यथा दध्यानयनस्यामीक्षा, यथा वा कपालस्य पुरोडाशः। तानि च कर्माणि श्रुत्यार्थादिप्रमाणावगत-क्रमेणानुष्ठितान्यपूर्वाधायकानि। तत्र चार्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः फलकामनावानधिकारी। यत्र चानुपदिष्टमितिकर्तव्यताजातं, तत्रातिदेशादेव तल्लाभः। यथा सौर्ययागादौ दार्शपौर्णमासिकप्रयाजादिकम्। यथा वा ज्योतिरादौ सौमिकदीक्षणीयादिकम्। ननु धर्माणां पारिप्लवत्वेन सर्वत्रा-प्युपदेशत एव प्राप्तिसंभवादतिदेशवैयर्थ्यमिति चेन्न, प्रकरणादिनियन्त्रितत्वेन पारिप्लवत्वासम्भवादतिदेशस्यावश्यकत्वात्। स चातिदेशो द्विविधः — सामान्यातिदेशः, विशेषातिदेशश्चेति। एवमतिदिष्टानां पदार्थानां मध्ये यस्य प्रकृतिक्लृप्तद्वारा सम्भवः, तस्य विकृतिविशेषं प्राप्तस्य द्वारान्तरसम्बन्ध-निमित्तोऽन्यथाभाव "ऊह" इत्युच्यते। यथा निर्वापमन्त्रस्य प्राकृतस्य सौर्ययागाङ्गनिर्वापादौ। यथा वा साम्नामुत्तरासु। प्राकृताश्च पदार्थाविकृतौ-उपकारमुखेन प्राप्यन्ते। अपेक्षाऽऽसत्तियोग्यत्वैस्तस्यैव प्रथममतिदेशौचित्यात् तन्मुखेन पदार्थातिदेशः। तन्मुखेन च शास्त्रातिदेशः। एवं च यत्रातिदेशतः प्राप्तुमुचितानां प्रत्याम्नानं प्रतिषेधोऽर्थलोपो वा तत्र तद्बाधः। यथा शरेण

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कुशानां, यथा वा प्रायणीयादौ निषेधेनाज्यभागयोः। यथा वा कृष्णलेष्व-वघातस्य। यत्र च प्रत्याम्नानाद्यभावः तत्र प्राकृतैस्सह वैकृतानां समुच्चयः। यथा साङ्ग्रहणीष्टौ उपहोमैरामनहोमानाम्। यथा वा महाग्नौ दीक्षाहुतीनां प्राकृतीभिः। एवमेकदेशैककालैककर्तृकत्वेनावगतानां कर्मणां फलमितिकर्तव्य-ताजातं च तन्त्रमेव भवति। यथाऽऽग्नेयादीनां स्वर्गः प्रयाजादिकं च। यत्र चान्यार्थमनुष्ठितस्यान्यार्थता — प्रासादार्थमारोपितस्य दीपस्य रथ्यार्थतेव — तत्र प्रसङ्गः। यथा पशुयागार्थमनुष्ठितानां प्रयाजादीनां च्छिद्रापिधान्यर्थता। एवं विमर्शपूर्वकमवधार्यानुष्ठितात्कर्मणः फलं निष्पद्यते। एवं च प्रतिषिद्धकाम्यवर्जमनुष्ठितैर्नित्यनैमित्तिकैः **कर्मभिर्मोक्षो** भवति।

ननु कर्मभिश्चेन्मोक्षः, तर्हि आरणे आत्मज्ञानविधीनां का गतिः? इति चेन्न, तेषां वाक्यानां जीवात्मनां परमात्मबोधफल-कत्वात्। एवं च प्रत्याहारादिकं योगमभ्यस्यन् विहितक्रियाश्च कुर्वन् मनःकरणकेन प्रत्यक्षेणात्मानं निश्चिनोति। स चात्मा जीवरूपेणास-न्भिन्नश्च। अथापि परमात्मरूपेण सद्रूपः। अभिन्नश्च। यथा शाबले-यादिषु भिन्नास्वपि गोव्यक्तिषु यथा गोत्वमनुगतं, एवं सुखदुःखादि-वैचित्र्यात् भिन्नेषु जीवेषु परमात्माऽनुवर्तते। एवंभूतं परमात्मानं त्रैयम्बकादिभिर्मन्त्रैर्ध्यायन् पूजयंश्च विरक्तो मुमुक्षुः विषयादृते परा-नन्दानुभूतिरूपं मोक्षं प्रतिपद्यते इति सिद्धम्॥

इति षड्दर्शनीसिद्धान्तसङ्ग्रहे भट्टमतसिद्धान्तसङ्ग्रहस्समाप्तः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ प्राभाकरमतं लिख्यते ॥

पूर्वमीमांसाया द्वादशलक्षण्या धर्मो विषयः। स च नियोगापूर्वादिशब्दाभिधेयो लौकिकश्श्रेयस्साधनं तत्कामनियोजकः तत्तद्धातूपात्तक्रियाविषयः। सदा नित्यं यावज्जीवमित्यादिनित्यत्वादिलिङ्गालिङ्गितधातूपात्तक्रियाविषयस्तु पण्डारूपः प्रत्यवायफलकं यद्विषयाननुष्ठानं अधिकारिणः तथा धर्मोऽपि दुरितापूर्वादिशब्दितश्चोदनालक्षणाद्धर्माद्विलक्षणः प्रतिषेधलक्षणः शेषशेषिरूपे धर्मरूपे कार्ये वेदः प्रमाणम्। स च नित्यनिर्दोषश्चतूरूपश्चोदनाभावेन कार्यबोधकस्तुतिनिन्दारूपैरर्थवादैः प्रवृत्तिनिवृत्त्युज्जीवकस्तुतिनिन्दावगमकस्मारकश्चानुष्ठेयार्थस्य मन्त्रांशेन नामावच्छिन्नतयाऽवशिष्टांशेन कर्माम्नायकः। प्रथमगृहीतकार्यान्वितव्युत्पत्त्यनुरोधात्।

ज्ञानकाण्डं भूतार्थमात्रप्रतिपादकमपि स्वापेक्षितममेदं कार्यमिति बोद्धृलक्षणनियोज्यसमर्पकतया स्वकिङ्करीकुर्वन्, स्मृतीतिहासपुराणकल्पसूत्रशिष्टाचारान्स्वाविरुद्धान्स्वमूलत्वेन प्रमाणीकुर्वन्, विरुद्धांश्च तुच्छीकुर्वन्, क्वचिद्वाक्यविशेषेण सन्देहमपाकुर्वन्, निरूपितः प्रथमे।

प्रमा चानुभूतिस्सर्वधियां, यथार्थत्वेन यथार्थविशेषणकृत्याभावात्। भ्रान्तिस्तु ग्रहणस्मरणात्मकमसंसर्गाग्रहसहितं ज्ञानद्वयमेव। देशान्तरसतस्सन्निकर्षाभावात्, अत्यन्तासतश्चाध्यक्षविषयत्वासम्भवात्। तत्र सतश्च बाधानुपपत्तेः। आत्मख्यातिस्तीर्थकरैरेव प्रत्याख्याता। मायामयं रजतमाविद्यकानिर्वचनीयादिशब्दितं भासत इति तु शिष्यदण्डनम्। तस्मात्सर्वो वेदो-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अनुभवं जनयन्धर्माधर्मविषये वेदार्थरूपे प्रमाणमेव। तदेवं प्रथमेऽध्याये प्रमाणं निरूपितम्।

द्वितीये शब्दान्तरादिषट्प्रमाण्या शास्त्रभेदो विचारितः। शेषशेषि-भावस्तु शास्त्रयोः श्रुतिलिङ्गादिप्रमाणषट्केन तृतीये निर्धारितः। तुरीये तु औपादानिकस्तद्वच्चुत्पादनपूर्वकं क्रत्वर्थपुरुषार्थभागश्च निर्णीतः। इदमनेन प्रयुज्यते, नानेनेति च। पञ्चमे श्रुत्यर्थपाठादिप्रमाणकः क्रमो निरूपितः। षष्ठे तु नियोज्यो यस्तु ममेदं कार्यमिति बुध्यते, बोद्धुं कर्तव्यतां अर्थी समर्थो विद्वान्च्छास्त्रेणापर्युदस्तोऽर्हति, न समर्थमात्रः पङ्ग्वन्धबधिराक्रियार्षेयदेवतादीनामनधिकारश्च। तदेवमुपदेशषट्केनोत्पत्ति-विनियोगप्रयोगाधिकारभेदेन चतूरूपोऽपि विधिर्निरूपितः। तदनन्तरं अनुपदिष्टाङ्गकाण्डविकृतिषण्डकथंभावाकाङ्क्षां पूरयितुं तद्वदिदं कर्तव्यमित्येवं-रूपोऽतिदेशः सामान्यविशेषात्मना सप्तमाष्टमाभ्यां प्रतिष्ठापितः।

ततःपरं द्वारान्तरसम्बन्धनिमित्तान्यथाभावात्मक ऊहो मंत्रसाम-संस्काराणां नवमे निर्णीतः। तदनु बाधाभ्युच्चयौ दशमे चिन्तितौ। तन्त्रप्रसङ्गौ एकादशद्वादशयोः परीक्षितौ।

इत्थं द्वादशलक्षण्या प्रमाणस्वरूपसाधनफलैः साभासैर्धर्मो वेदार्थो निर्धारितः। तदनुकूलतया तत्र तत्र वेदाध्ययनं अध्यापन-विधिप्रयुक्तं न स्वविधिप्रयुक्तं, उपनयनमध्यापनाङ्गं नाध्ययनाङ्गं, आचार्यककामो नियोज्यः, नियोगश्च ग्राहकः, शेषाणां च ग्राहकग्रहणं, ग्राहकैदमर्थ्यं करणैदमर्थ्यं द्वारैदमर्थ्यं इत्यैदमर्थ्यत्रयं, लिङ् लोट् तव्य-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रत्ययादिवाच्ये कार्ये प्रकृत्यर्थस्य विषयत्वेनान्वयः, शाब्दः, पश्चात् करणत्वेनौपादानिकः, पशुकामः, पुत्रकाम इत्यादिपदोपस्थापितस्य प्रशस्त्वं नियोज्यत्वेन शाब्दः, पश्चात्कर्तृत्वादिना अन्वय औपादानिकः, श्रुतेतरनियोज्यके विश्वजिदादौ नियोज्यस्यैवाध्याहारः, पदाध्याहृतः गौरवादतिप्रसङ्गस्य पक्षद्वयसाधारण्यात्, तात्पर्यसत्वासत्वाभ्यां परिहारस्यापि साम्यात्, ऋषभवृषभादिसन्देहेऽपि तदर्थज्ञापकत्वेन ज्ञातस्य पदस्यानुभावकत्वम् । अत एव नित्यानुमेयस्यापि वेदस्य मूलत्वं कार्यताज्ञानं प्रवर्तकम् । अत एव कार्यत्वप्रकारके ज्ञाने पदानां शक्तिः । शक्तिश्च पदार्थान्तरं, देवताया विग्रहादिपंचकाभावः । चतुर्थ्यन्तेन कर्माङ्गभावेन विनियुज्यमाना देवता, जगदनीश्वरत्वं, सर्गप्रलयाभावत्रिपुटीप्रकाशवादः, शरीरेन्द्रियादीनां अनात्मत्वं, कर्मैव वेदतात्पर्यविषयः, तात्पर्यविषये च शब्दः प्रमाणं, इत्यादिप्रक्रियाः प्रभाकृदुन्नीताग्रन्थगौरवभयान्न प्रदर्शिताः ।

प्रयोजनं तु स्वर्गपशुपुत्राद्यनित्यम् । नित्यं तु मोक्षरूपम् । उभयमपि कर्मजन्यमेव । ननु "कर्मणा एव बध्यते तत एव मुच्यत" इति विरुद्धमिव भातीति, नैष दोषः । काम्यनिषिद्धकर्माण्यनुतिष्ठन् बध्यते, नित्यनैमित्तिकान्यनुतिष्ठन् वर्जयंश्च काम्यनिषिद्धानि, पुरुषो मुच्यते । "कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥" "न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः । श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते" इत्यादिस्मरणात् । कर्म च मनोवाक्कायव्यापाररूपम्, उपासनमपि मानसं कर्मैव । किंचिच्छरीरिमात्रनियोज्यकं, किंचिच्चातुर्वर्ण्यचातुराश्रम्यनियोज्यकम् । तत्र वर्णाश्रमजुषामननुष्ठितस्वस्व-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धर्माणामवर्जितप्रतिषिद्धानां चाविगीतप्रत्यवायः। शरीरिमात्रस्यापि तन्मात्र-प्रयुक्तशास्त्रमर्यादालङ्घिनश्च स एव न्यायः। सत्यपि शरीरे तदभिमानहीनाः वर्णाश्रमेष्वपि तद्वशाः पुरुषधौरेयाः केचिदद्यत्वेऽपि भूमिं परिष्कुर्वते। तानधिकुर्वन्ति विधिनिषेधशास्त्राणि, न वा पातयन्ति अननुतिष्ठतः कर्माणीति श्रद्धामात्रविलसितमेतत्। न हि मृतशरीरमिव तच्छरीरं दृश्यते। हिताऽहितप्रेप्साषरिजिहीर्षाभ्यां ऋते प्रवृत्तिनिवृत्योरसंभावितयोस्तत्र दर्शनात्, अहमाकारममकाररराहित्यस्याप्रामाणिकत्वात्। तस्मात् शरीरिमात्रं कर्माधिकारि। वर्णाश्रमप्रविष्टास्तु सुतराम्। तथा च फलमभिसन्धाय कर्माण्यनुतिष्ठन्, प्रसज्जंश्च प्रतिषिद्धेषु बध्यते; परिहरंश्च प्रतिषिद्धं, परिपालयंश्च यावन्नित्य-नैमित्तिकं, गृहस्थोऽपि मुच्यत एव। परिव्राडपि स्वाश्रमविहितकर्मप्रविष्ट-एव। कर्मणा तस्य न प्रयोजनं, ज्ञानादेव मुक्तिरिति तावता न मन्तव्यं। श्रवणादीन्यपि विहितकर्मकाण्येव। मोक्षश्चात्मनः कैवल्येनावस्थानम्। तच्चेत्थं। शरीरेन्द्रियमनोबुद्धिसंबन्धनिबन्धनो हि बन्धः, काम्यनिषिद्धवर्जनाच्छरी-रारंभकयोः धर्माधर्मयोरनार्जने वर्तमानशरीरारम्भकस्य प्रारब्धकर्मणो भोगात् क्षये, यावन्नित्यनैमित्तिकानुष्ठानेन सञ्चितकर्मणान्नाशे, तदननुष्ठानप्रयुक्तप्रत्यवाय-स्याप्यप्रसक्तौ, वर्तमानशरीरापगमे, कारणाभावाच्छरीरान्तरानुत्पत्तौ, तन्मूल-बन्धविच्छेदलक्षणो मोक्षस्सेत्स्यति।

ननूक्तमोक्षात्संसार एव श्रेयान्, यत्र लेशेनाऽपि सुखमनु-भूयते। नैष दोषः, स हि मोक्षशास्त्राधिकारी यस्तु उत्तरोत्तर-शतगुणितानन्दानपि विषसंपृक्तान्नवत् दुःखानुषङ्गेण क्षयिष्णुत्वसातिश-यत्वाभ्यां च वीचीसमं मन्यते। शरीरेन्द्रियविहीनस्य मुक्तिदशाया-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मात्मनो वैषयिकसुखाप्रसक्तौ नित्यसुखसत्वे संसारदशायामप्युपलम्भ-प्रसङ्गात्, मुक्तिकालेप्यभिव्यञ्जकाभावात्, केवलात्मन एवाभिव्यञ्जकत्वे त्वनित्याया अभिव्यक्तेः, शरीरादिहीने शङ्कितुमशक्यत्वात्, आत्मन-एवानन्दरूपत्वेऽपि तदभिव्यक्तेरसंभवात्, दुःखाभावस्यापि स्वतः पुरुषार्थत्वात्, तन्मात्रार्थिन एव मोक्षशास्त्रेऽधिकारः। सच्चिदा-नन्दरूपं ब्रह्म निष्प्रपञ्चं, निर्गुणं, निष्क्रियं, जीवश्च तत्स्वरूपः। तस्याविद्यकं कर्तृत्वादिप्रपञ्चमिथ्यात्वमविद्यामूलकारणम्। सर्वस्य ज्ञाना-न्मुक्तिरित्यादि निष्प्रमाणमेव। तस्मात्कर्मैव मोक्षसाधनमिति सिद्धम्॥

इति श्रीषड्दर्शनीसिद्धान्तसङ्ग्रहे प्रभाकरमतसिद्धान्तसङ्ग्रहः समाप्तः॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ साङ्ख्यदर्शनसिद्धान्तो लिख्यते ॥

साङ्ख्यशास्त्रं द्विविधम् – निरीश्वरं, सेश्वरं च । निरीश्वरं कापिलं, सेश्वरं पातञ्जलम् । तत्र श्रीभगवान्वासुदेव एव परमकारुणिको लोकानुजिघृक्षया कपिलमहामुनिरूपेणोर्व्यां अवतीर्णः साङ्ख्यशास्त्रं प्रणीतवान् श्रीभगवाननन्तश्च तादृशः पतञ्जलिरूपेणावतीर्णः योगशास्त्रं प्रणीतवान् ।

तत्त्वज्ञानान्मुक्तिरिति कापिलस्सिद्धान्तः । योगेन दृढीकृतात्तत्त्वज्ञानान्मुक्तिरिति पातञ्जलः । तत्र निरीश्वरसांख्यदर्शनमेव प्रथमं प्रदर्श्यते । एतदेव श्रुतिस्मृतीतिहासपुराणशैवागमादिषु स्पष्टं दरीदृश्यते । व्यक्ताऽव्यक्तसंज्ञितप्रकृतितत्कार्यविवेकेन पुरुषस्याग्रहात्संसारः । तद्विवेकेन तज्ज्ञानात् त्रिविधस्याऽपि दुःखस्यात्यन्तिकनिवृत्तिरूपः पुरूषार्थ इति । तथा च सूत्रम् – "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ" इति । अस्यार्थः – वैराग्यानन्तरं एतच्छास्त्रे प्रवृत्तस्य तत्त्वज्ञाने सति आध्यात्मिकाधिदैविकाधिभौतिकरूपत्रिविधदुःखस्य निवृत्तिरात्यन्तिकी परमपुरुषार्थरूपो मोक्षो भवतीति । एतेन विषयप्रयोजनसम्बन्धाधिकारिरूपं प्रवृत्त्यङ्गमनुबन्धचतुष्टयमुक्तं भवति । प्रकृतिपुरुषविवेको विषयः त्रिविधदुःखात्यन्तनिवृत्तिः प्रयोजनम् । विवेकशास्त्रयोः प्रतिपाद्यप्रतिपादकभावस्सम्बन्धः । ऐहिकामुष्मिकभोगवैराग्यवानधिकारीति ।

पशुपक्ष्यादिजनितमाधिभौतिकं दुःखम् । ग्रहभूतविद्युदादिजनितमाधिदैविकम् । ज्वरपिटकादिजनितमाध्यात्मिकम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ननु इदं शास्त्रं नारम्भणीयं, भवदभिमतपुरुषार्थस्य दृष्टादेव सुकरोपायात्सिद्धिसम्भवात्। सर्वसङ्गपरित्यागस्य चातिकठिनत्वात्। मन्दोऽपि सुकरोपायेनैव स्वेष्टसिद्धिसम्भवे, तदर्थं दुष्करोपाये प्रवर्तते। "अक्वे चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्याऽर्थस्य संसिद्धौ को विद्वान्यत्नमाचरेदि"ति न्यायात्। सुकरोपायाश्च शारीरदुःखनिवृत्तये औषधादयः। कर्मविपाकादयश्च सन्ति। मानसदुःखनिवृत्तये च द्व्यष्टवयस्क-वधूरत्नपरिरम्भणादयः। आधिभौतिकदुःखनिवृत्तये च नीतिशास्त्रप्रतिपादिता नानोपायाः। "नैकोधिगच्छेदध्वानं नैकः स्वप्यात्कथंचने"त्येवमादयः। अतस्तैरेव दुःखत्रयनिवृत्तिसम्भवात्तदर्थं शास्त्रमनारम्भणीयमिति चेन्न, न वयं दुःखनिवृत्तिमात्रं पुरुषार्थं ब्रूमः। किंचात्यन्तिकदुःखनिवृत्तिः औषधादिना नात्यन्तदुःखं निवर्तते। कर्मविपाकादिना चाङ्गवैगुण्याद्यपराधान्न निवर्तते। यदि वा कथंचिन्निवर्तेत तथापि पुनरन्येन भाव्यमिति नियन्तुमशक्यम्। अतः आत्यन्तिकदुःखत्रयनिवृत्तिरुपायसहस्रापेक्षायामपि न ततो भवतीति तदर्थं शास्त्रमारम्भणीयम् तत्त्वज्ञानार्थमिति।

तत्त्वज्ञानं च पञ्चविंशतितत्त्वज्ञानम्। "पञ्चविंशतितत्त्वज्ञो यत्र कुत्राऽऽश्रमे वसन्। जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः" इति वचनात्। "पञ्चविंशतितत्त्वानि पुरुषः प्रकृतिर्महान्। अहङ्कारश्च शब्दश्च स्पर्शरूपरसास्तथा॥ गन्धःश्रोत्रं त्वक्च चक्षुर्जिह्वा घ्राणं च वागपि। पाणिः पादस्तथा पायुरुपस्थश्च मनस्तथा॥ पृथिव्या-पस्तथा तेजो वायुराकाशमित्यपि"। इमानि पंचविंशतितत्त्वानि।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथैषामुत्पत्तिप्रकारः कथ्यते । सर्वमिदं जगत्तत्त्वात्मकं प्रकृतेः कार्यम् । प्रकृतिश्च नित्यैका जडा त्रिगुणात्मिका च । उदासीनोप्यात्मा तदावेशात् कर्तृवदवभासते । साप्यात्मयोगात् चेतनावदवभासते । अयं च योगः पङ्ग्वन्धयोगवत् कार्यक्षमो भवति । गुणानां साम्यावस्था प्रकृतिः । गुणाश्च सत्त्वरजस्तमांसि । सत्त्वगुणस्य च कार्याणि सुख-प्रीतिशान्तिलज्जाङ्गलाघवक्षमाधृतिदमाकार्पण्यज्ञानप्रकाशनानि । रजोगुणस्य च लोभ सन्तापकोपविग्रहाभिमानमृषावदप्रवृत्तिदम्भरूपाणि । तमो-गुणस्य तु तन्द्रीमोहनिद्राङ्गगौरवालस्यप्रबोधप्रमादप्रभृतीनि । एवंरूपायाः प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात् शब्दस्पर्शरूपरसगन्धात्मकानि पञ्चभूतसूक्ष्माणि, तेभ्यश्च सत्त्वगुणोद्रेकात् ज्ञानेन्द्रियाणि श्रोत्रत्वक्-चक्षुर्जिह्वाघ्राणरूपाणि, शब्दस्पर्शरूपरसगन्धग्राहकाणि, तेभ्य एव रजो-गुणोद्रेकात् कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थरूपाणि वचनादानगमन-विसर्गानन्दनकार्यकाणि, तेभ्य एव सत्त्वरजोरूपगुणद्वयोद्रेकात् ज्ञान-कर्मेन्द्रियात्मकं एकादशमन्तःकरणाख्यं मनः, तेभ्य एव च तमोगुणो-द्रेकात् महाभूतानि पृथिव्यप्तेजोवाय्वाकाशरूपाणि, एवं पञ्चविंशति-तत्त्वानामुत्पत्तिक्रमः ।

एतेषां तत्त्वानां विपर्ययेण स्वस्वकारणेषु लयः । प्रकृत्याख्यतत्त्वे स्थितमेव जगत् गुणवैषम्येणाभिव्यज्यते । नासदुत्पद्यते । यद्यसदुत्पद्येत, शशशृङ्गादिकमप्युत्पद्येत । तैलं च तिलेभ्य इव सिकताभ्योऽपि स्यात् । न च "सत उत्पत्तिस्वीकारे जनितस्याऽपि जननं स्यादिति" वाच्यम् । अभिव्यञ्जककारणैरभिव्यक्तेरेव स्वीकृतत्वात् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आत्मानश्च प्रतिशरीरं भिन्नाः, सुखदुःखादिवैचित्र्यात् । यदि चाऽऽत्मा एक एव स्यात् तर्हि एकस्मिन्नुत्पद्यमाने, पश्यति, शृण्वति, च सर्वेषामपि तत्प्रसङ्गः । तेचाऽऽत्मानो न कर्तारः, किन्तु केवलं भोक्तारः । प्रकृतिपुरुषविवेकाग्रहनिमित्तकर्तृत्वादिबन्धनिवृत्त्यर्थं प्रकृतिविविक्ततया, अकर्तृतया च आत्मतत्त्वज्ञानं मोक्षसाधनम् । प्रवृत्तिरूपयागादिधर्मस्तु बन्धहेतुः । काम्यानां भोगैकहेतुत्वात् । न च "ब्रह्मार्पणतया कृतानां कर्मणां न बन्धहेतुत्वं, किन्तु मोक्षहेतुत्वमि"ति वाच्यम् । विध्यर्थवादमन्त्रादिप्रतिपन्नदेवताद्युल्लङ्घनेन ब्रह्मार्पणतया तदनुष्ठाने अयज्ञत्वप्रसङ्गात् । तस्मात्फलानुरागिभिस्संसारेषु प्रवर्तका यागादयो यथाविध्यनुष्ठेयाः । विरक्तैस्तु त्रिविधदुःखात्यन्तनिवृत्तिरूपमुक्तये तत्त्वज्ञानं सम्पादनीयमिति सिद्धम् ।

इति षड्दर्शनीसिद्धान्तसङ्ग्रहे साङ्ख्यमतसिद्धान्तसङ्ग्रहः समाप्तः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ पातञ्जलं योगशास्त्रं लिख्यते ॥

अस्य शास्त्रस्य योगो विषयः । कैवल्यं फलम् । योगजिज्ञासुरधिकारी । योगश्च चित्तवृत्तिनिरोधः । चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयः परिणामरूपास्तासां निरोधः, बहिर्मुखपरिणामविच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे योगः, योग इत्याख्यायते । स च सर्वासां चित्तभूमीनां सर्वप्राणिनां धर्मः । कदाचित्कदाचित्कस्यांचिद्बुद्धौ क्रमादाविर्भवति । ताश्च भूमयः — क्षिप्तं मूढं, विक्षिप्तं, एकाग्रं, निरुद्धमिति पञ्च, चित्तभूमयः चित्तस्यावस्थाविशेषाः । तत्र क्षिप्तं, रजस उद्रेकादस्थिरम् बहिर्मुखतया सुखदुःखादिविषयेषु व्यवहितेषु सन्निहितेषु वा रजसा प्रेरितम् । तच्च सदैव दैत्यदानवादीनाम् । मूढं, तमस उद्रेकात् कृत्याकृत्यविवेकमन्तरेण क्रोधादिभिर्विरुद्धकृत्येष्वेव नियमितम् । तच्च सदैव रक्षःपिशाचादीनाम् । विक्षिप्तं, तु सत्वोद्रेकात् परिहृतदुःखसाधनं, सुखसाधनेष्वेव शब्दादिषु प्रवृत्तम् । तच्च सदैव देवानाम् । एतास्तिस्रोऽपि चित्तावस्थाः समाधौ नोपयुज्यन्ते । एकाग्रनिरुद्धरूपे द्वे अवस्थे तु सत्वोत्कर्षात् समाधावुत्कर्षं भजेते । एकाग्रं, तु सत्वप्रधानं एकविषयं स्थिरं निरुद्धरजस्तमोवृत्तिकम् । निरुद्धं, तु निरुद्धसर्ववृत्तिकम् । अनयोर्भूम्योर्यश्चित्तस्यैकाग्रतारूपः परिणामः स योगः ।

अनयोरेव भूम्योः योगस्संभवति । निर्विकारस्यात्मनश्शान्तो मूढोस्मीत्याद्यभिमानापादकं चित्तम् । वृत्तयश्च क्लिष्टाऽक्लिष्टरूपाः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रागद्वेषहेतवः क्लिष्टाः, अक्लिष्टाः क्लेशनाशिन्यः। ताश्च वृत्तयः पञ्चविधाः-प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदात्। प्रमाणानि च प्रत्यक्षानुमानागमाः। विपर्ययो मिथ्याज्ञानम्। शब्दज्ञानानन्तरभावी अविद्यमानार्थविषयः प्रत्ययो विकल्पः। निद्रा च समस्तविषयपरित्यागेन "सुखमहमस्वाप्सम्"इति स्मृति-हेतुभूता तमोमयी वृत्तिः। स्मृतिः प्रसिद्धा। तत्र प्रमाणविपर्ययविकल्पा-जाग्रदवस्थाः। त एव यदनुभवबलात् प्रत्यक्षायमाणाः स स्वप्नः। निरोधश्च वृत्तिप्रतिहननम्। अभ्यासवैराग्ये तत्साधने। चेतसस्स्वरूपे पुनःपुनर्निवेशन-मभ्यासः। ऐहिकाऽऽमुष्मिकविषयवैतृष्ण्यं वैराग्यम्।

योगो द्विविधः — क्रियायोगो ज्ञानयोगश्च। क्रियायोगस्त्रिविधः-तपोमन्त्रजपेश्वरभक्तिभेदात्। तैश्च योगान्तरायविनाशे सति ज्ञानयोगः प्रवर्तते। सोऽपि द्विविधः – सम्प्रज्ञातोऽसम्प्रज्ञातः। भाव्यस्वरूपं येन सम्यक् ज्ञायते स सम्प्रज्ञातः। भाव्यं च द्विविधम् — ईश्वरस्तत्त्वानि च। तत्त्वान्यपि द्विविधानि — जडाऽजडभेदात्। जडानि चतुर्विंशतिः। तानि च साङ्ख्यमते निरूपितानि। अजडः पुरुषः। क्लेशकर्मविपाकाशयैर-परामृष्टः सर्वज्ञः पुरुष ईश्वरः। क्लेशाः अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः। अनात्मादिष्वात्माद्यभिमानः, पुत्रमित्रादिषु ममेति धीश्चाऽविद्या। आत्माऽन्तः-करणयोरभेदाभिमानोऽस्मिता। वैषयिकसुखतृष्णा रागः। दुःखविषयः क्रोधः द्वेषः। शरीरवियोगादिनिमित्तजं भयमभिनिवेशः। कर्म धर्माऽधर्मौ। तयोः फलं विपाकः। तदनुकूलास्संस्कारा आशयाः।

स चेश्वरः पूर्वेषां ब्रह्मादीनामपि गुरुः प्रणववाच्यः। असं-प्रज्ञातयोगस्तु यस्मिन्नेव किञ्चिदपि न ज्ञायते सः। अस्य च

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मुक्तिः फलम्। ननु "तत्त्वज्ञानादेव मुक्तिसम्भवे, किं योगेनेति" चेन्न, तत्त्वज्ञानेनाऽविद्यानिवृत्तावपि देहानुवृत्त्या दोषाणां दृश्यमानतया, तन्निवृत्तये योगस्याऽऽवश्यकत्वात्। दोषाश्च आलस्यतीव्रव्याधिप्रमादाऽस्थानसम्भ्रमाऽनवस्थितचित्तत्वाऽश्रद्धाभ्रान्तिदर्शनदुःखदौर्मनस्यविषयलोलतादयः। मैत्रीकरुणामुदितोपेक्षाः योगसाधनानि। सत्सु मैत्री, दुःखिते करुणा, धर्मेऽनुमोदनं, पापिषूपेक्षा, सत्सङ्गतिः, भगवच्चरिताऽभ्यासः, भगवत्क्षेत्रसेवा, प्रत्यगात्मभावना, एते चित्तसंस्काराः। एतैश्शुद्धं मनः अतिसूक्ष्माद्यर्थग्रहणे समर्थं भवति।

योगस्य चाष्टावङ्गानि — यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधिभेदात्। यमाः पञ्चविधाः — अहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रहश्च। अहिंसाफलं योगिनः समीपे परस्परं वैरत्यागः। सत्यादमोघवाक्यता। अस्तेयाद्रत्नलाभः। ब्रह्मचर्याद्वीर्यलाभः। अपरिग्रहाज्जन्मज्ञानम्। नियमाश्च पञ्च — शौचसन्तोषतपोमन्त्रजपेश्वरसेवाः। शौचात्स्वाङ्गजुगुप्सा, दुर्जनस्पर्शवर्जनं, सत्वशुद्धिः, सौमनस्यं, इन्द्रियैकाग्र्यं, आत्मदर्शनयोग्यता च मनश्शौचफलम्। सन्तोषादनुत्तमसुखावाप्तिः। इन्द्रियाणां दूरदर्शनयोग्यता तपसः फलम्। कायिकाणिमादिसिद्धयश्च। जपेन देवताकर्षः। ईश्वरसेवया समाधिः। आसनं, सुखं स्थिरत्वं वीरस्वस्तिकादिभेदभिन्नं, ततश्शीतोष्णादिद्वन्द्वनाशः। प्राणापाननिरोधः प्राणायामः। स च त्रिविधः- रेचकपूरककुम्भकभेदात्। वायोरेचनाद्रेचकः। पूरणात्पूरकः। पूर्णकुम्भवदवस्थानात्कुम्भकः। रेचकादीन्हित्वा वायोर्निजस्थितिश्चतुर्थः प्रकारः। अस्य च प्रकारस्याविद्यापापनाशः फलम्। विषयेभ्य इन्द्रियाणां निवर्तनं प्रत्याहारः।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अस्य च फलं इन्द्रियवशीकरणम् । चित्तस्य देशबन्धो धारणा । देशो द्विविधः – बाह्याभ्यन्तरभेदात् । बाह्यः प्रतिमादिः । आभ्यन्तरो नाभिचक्रहृदादिः । बन्धनं तत्र चित्तस्य प्रवृत्तिरेव । नाभिचक्रादिदेशेषु प्रत्ययस्य अनन्यवृत्तिता ध्यानम् । तत्रैव देशे शून्यवत्स्थितिस्समाधिः । एकविषयाणां धारणादीनां त्रयाणां संयम इति व्यावहारिकं नाम ।

एतत्संयमजयात्प्रज्ञासिद्धिः । संयमस्य च यमादिपञ्चकं साधनम् । तस्य संयमस्य भूमिषु विनियोगः । भूमयश्च स्थूलसूक्ष्मादिरूपालम्बनानि । स्थूलाद्यालम्बनानि अजित्वा सूक्ष्माद्यालम्बनानि नारोहेत् । तथाऽऽरोहणे हिक्काश्वासप्रतिश्यायकर्णदन्ताऽक्षिवेदनमूकताजडताकासशिरोरोगज्वरादयः योगिनस्स्युः । यस्येश्वरप्रसादेन योगः, तस्य तु नाधरोत्तरभूमिजा रोगास्सम्भवन्ति । योगमभ्यस्यताऽवश्यन्नाडीचक्रगतिर्ज्ञेया । तत्र मध्यवंशास्थिमार्गेण शिरोगता सुषुम्नासंज्ञिका नाडी मुक्तिमार्गः । इडापिङ्गले द्वे नाड्यौ सव्यदक्षिणे द्वे नासापुटे । इडा चन्द्रस्य भागः मार्गश्च । पिङ्गला च रवेः । कुहूर्नाम नाडी अधोगता लिङ्गं वृषणं पायुमपि व्याप्य तिष्ठति । विश्वोदराचारणे द्वे नाड्यौ सव्येतरकरौ व्याप्य तिष्ठतः । अस्तिजिह्वायशस्विनीति द्वे नाड्यौ सव्येतराङ्घ्री व्याप्य तिष्ठतः । सुषुम्ना पृष्ठगता सरस्वतीसंज्ञिका नाडी जिह्वां व्याप्य तिष्ठति । शङ्खिनीपयस्विनीसंज्ञिके द्वे नाड्यौ तत्पार्श्वगामिन्यौ सव्येतरकर्णौ व्याप्य तिष्ठतः । गान्धारा सव्यनेत्रं, पूषा दक्षिणनेत्रम् । ज्ञानकर्मेन्द्रियनाड्यः सर्वाः कण्ठाद्विनिर्गताः । प्राणादिवायुसञ्चारस्सिरापरनामधेयास्वेतास्वेव नाडीषु ज्ञेयः ।

CC-0. Sārasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धर्मादिसंस्कारेषु संयमे पूर्वजातिपरिज्ञानं भवति। हस्त्यादिबलसंयमे हस्त्यादिबलसिद्धिः । मैत्र्यादिसंयमे मैत्र्याद्युत्कर्षसिद्धिः । चन्द्रसंयमे तारकागणसन्निवेशज्ञानम् । ध्रुवे संयमे तारकाग्रहादिगतिविज्ञानम् । सूर्ये संयमे सकलभुवनज्ञानम्। एवं बाह्यसिद्धयः ।

आन्तरसिद्धयस्तु नाभिचक्रे संयमात् कायसन्निवेशज्ञानम् । कण्ठकूपे जिह्वामूले कूपाकारप्रदेशे संयमात्क्षुत्पिपासानिवृत्तिः। कण्ठकूपादधोवर्तिन्यां कूर्मनाड्यां संयमाच्चित्तकाययोस्स्थैर्यं भवति । ऊर्ध्वज्योतिषि शिरःकपालच्छिद्रे पिण्डीभूतहृदयप्रकाशसम्बन्धिनि संयमाद्द्यावापृथिव्योरन्तराले ये दिव्याः पुरुषाः परैर्द्रष्टुमशक्यास्तेषां दर्शनं तैस्सह संभाषणं च भवति । व्याप्तिशीलयोरात्मचित्तयोः शरीरमात्रस्थितिरूपस्संकोचहेतुभूतकर्मणस्तादृशात्मसमाधिना नाशे सति इतरनाडीविलक्षणचित्तवहनाड्या चित्तसञ्चारज्ञाने च सति परकाये चित्तमिन्द्रियैस्सह प्रविशति । ततस्तत्र भोगोऽपि भवति । एवमुदानादिजयात् जलकर्दमकण्टकादिषु परिगमनम् अनन्यसाधारणी शोभा, दिव्येन्द्रियप्राप्तिः, आकाशविहारः, सर्वज्ञता। भूतजयादणिमाद्यष्टैश्वर्यप्राप्तिः । एवमन्यास्सिद्धयो द्रष्टव्याः। एतास्सिद्धयो वत्सरार्धेन वत्सरेण वा भवन्ति । तथा च विरक्तस्य योगाभ्यासमहिम्ना निरस्तालस्यादिसमस्तदोषस्य तत्त्वज्ञानात्सकलदुःखनिवृत्तिरूपमोक्षो भवतीति सिद्धम् ॥

इति षड्दर्शनीसिद्धान्तसङ्ग्रहे पातञ्जलसिद्धान्तसङ्ग्रहः समाप्तः । श्रीमद्गुरुभ्यो नमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादमतं समस्तश्रुतीतिहासपुराणसम्मतं दूरीकृतसर्वतन्त्र-सिद्धान्तं लिख्यते ॥

लिलिखैषितोत्तरमीमांसा चतुर्लक्षणी । तस्याश्शुद्धबुद्धमुक्तस्वभावं, नित्यं निर्विकारं निरञ्जनं निर्लेपं निष्प्रपञ्चं सच्चिदानन्दरूपं स्वप्रकाशं कूटस्थ-मचलं नित्यतृप्तं सर्वविद्यास्थानपरमतात्पर्यविषयीभूतमौपनिषदमखण्डचैतन्यं विषयः । प्रयोजनं च सकलदुःखालयसंसारमूलकारणनिबर्हणद्वारा निरति-शयानन्दात्मनाऽवस्थानम् । प्राणिमात्रं संसरदाविमुक्तेः दुःखमनुभवत्येव । मध्ये मध्ये सुखमपि किंचित्किंचित् यावदात्मयाथात्म्यज्ञानं, सुखदुःखयोस्तार-तम्यं चिराऽचिरकृतमुत्कर्षापकर्षकृतं च सुखदुःखप्राप्तिपरिहारोपायं च मृगयते दुःखमप्यनुभूयाऽधिकसुखोपाये प्रवर्तते । सुखमपि परित्यज्य बहुतरदुःखस्य तरणोपाये सुखदुःखे च वैषयिके परस्परमविनाभूते इत्यपि जानात्येव । कदाचित् निर्विद्यमानमपि तादृशं सुखं नास्ति; यस्मिंल्लब्धे न पुनःक्लेश-सम्बन्धः । सत्वेऽपि वा तदुपायो नास्ति । तत्सत्वेऽपि वा मननसाध्यमित्य-नादिवसनावासितान्तः-करणतया दृढतरन्निर्विद्यते । कर्मण्येव तत्तत्कर्मानुसारता परमेश्वरेण प्रेरितं सत् तत्तत्कर्म तत्तत्फलकरणभोगरूपं संसारमनुसरति । यदा तु बहुजन्मसम्पादितसुकृतपरिपाकवशात् भगवदनुग्रहाच्च निर्मली-कृतान्तःकरणो जीवलोक आसत्यलोकमनित्यमेव । तस्माद्धेयमेव दुःखवदिदं परिहरणीयम् । सर्वथा अस्तु वा मा वा नित्यसुखमिति दन्दह्यमानकानन-शकुन्त इवात्मलाभाय उड्डीनं मन्यते । तदा संसारमूलकारणमुच्छेत्तुं मृगयते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कर्म वा भ्रान्तिर्वा मूलं भवदपि भवेदुभयमपि न युक्तं, परस्पराश्रयप्रसङ्गात्, प्रवाहानादित्वात्। परिहारेऽपि तत्त्वज्ञानात् भ्रान्तिनिवृत्तौ कर्म निवर्तते।

कर्मकारणयो रागद्वेषयोस्सतोः तदत्यन्तनिवृत्त्ययोगात्, भ्रान्तौ तु नष्टायां तन्मूलस्सर्वोऽपि निवर्तते। ततस्तदुन्मीलनाय तत्त्वज्ञानमेव सम्पादनीयम्। भ्रान्तिश्च संसारमूलम्। अनित्येष्वनुपादेयेषु न नित्यत्वोपादेयत्वबुद्धिः। निश्चिन्वतोऽप्यनित्यत्वानुपादेयत्वे संसारानुवृत्तेः अनात्मनि शरीरादावात्मतादात्म्यभ्रमः, तद्धर्माणां च स्वस्मिन्नारोप इति चेत्तन्न, अधीतसाङ्गस्वाध्यायस्य विदितपदपदार्थसङ्गतिकस्य मीमांसितशाब्दन्यायतत्त्वस्यास्तिकस्य स्वस्वभाषाभिरवगतोक्ताऽत्मतत्त्वस्य प्राणिमात्रस्य च संसारोपालम्भादपरोक्षभ्रमस्य परोक्षज्ञानानुपमृद्यत्वादुपलभ्यमानसंसारनिर्वाहे वर्णितचैतन्यस्वभावेऽप्यात्मनि विपरीतस्वभावप्रतिलंभस्याऽपि निर्वाहादनेकात्मवादस्य कल्पनागौरवग्रस्तत्वात्, स्थूलारुन्धतीन्यायेन कर्मकाण्डोपासनाकाण्डयोरुपपत्तिः। अतश्चैतन्यमात्रमनुपप्लवमन्यत्सर्वं भ्रान्तिविलसितम्। स्वप्नकल्पितप्रपञ्चकल्पत्वाद्धेयं चेति विमृशति। विमृश्य चेत्थं परित्यक्तसकलकर्मा, साक्षाच्चिकीर्षुः शान्त्यादिसम्पन्नः करतलामलकीकृतात्मतत्त्वं गुरुमुपसृत्य, प्रसाद्य तं शुश्रूषादिभिः, यथाधिकारं उपनिषदादिभिस्स्वस्वभाषादिभिश्च उपश्रुत्य, उपश्रुतात्मतत्त्वमुपपत्तिभिः मत्वा, मतमात्मतत्त्वं ध्यायंध्यायं अप्रतिबद्धं साक्षात्कुरुते। साक्षात्कृतात्मतत्त्वश्च जीवन्मुक्त एव। यावत्प्रारब्धं निवृत्तावरणशक्तिकाऽविद्योऽपि विक्षेपशक्तिमात्राऽवशेषिताऽविद्यो नित्यतृप्तो निर्धूतसकलक्लेशो ब्रह्मभूयमनुभूय जडवदुन्मत्तवल्लोकैरीक्ष्यमाणः कृतकृत्यो भवति।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

निरूपितार्थप्रतिपादकानामौपनिषदानां वाक्यानां अपेक्षिता न्यायाः श्रीमदाचार्यवेदव्यासैस्सूत्रिताः, श्रीमच्छङ्करभगवत्पादैस्तत्तद्वादिबुद्धिकल्पितन्यायाऽऽभासनिराकरणपूर्वकं प्रकटीकृताः। "उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः" इति न्यायेन काश्चित्प्रक्रियाः च, सर्वथाऽद्वैतसिद्धौ परमतात्पर्यम्। नातीव यतितव्यं सिद्धान्तभेदेषु। ते च सिद्धान्तलेशसङ्ग्रहादिषु द्रष्टव्याः, ग्रन्थविस्तरभयान्नेह प्रदर्शिताः।

तत्र समन्वयाऽध्याये बृहतेर्धातोरर्थाऽनुगमात्त्रिविधपरिच्छेदशून्ये पूर्वोक्तरूपे ब्रह्मणि सर्वासामुपनिषदां सम्यगन्वयस्समर्थितः। स्वरूपतटस्थलक्षणे विषयप्रयोजने च चतुर्लक्षण्युपोद्धातत्वेन सर्वव्यवहारस्याऽध्यासमूलत्वं, सकलविधिनिषेधशास्त्राणां चाऽविद्यावद्विषयत्वं, व्यवहारदशायां विदुषामपि पश्वादिसमत्वं व्युत्पादितम्।

द्वितीयेऽध्याये सर्वतन्त्रैर्विरोधः परिहृतः। परिहारश्चेत्थम् — "अभियुक्ताश्च ये यत्र यन्निबन्धप्रयोजनाः। तत्रत्यगुणदोषाणां ज्ञाने चाधिकृता मताः" इति न्यायेन वेदाङ्गानां शीक्षाकल्पादीनां वैदिकशब्दान्वाख्यानकर्मप्रयोगादितात्पर्यम्। न्यायवैशेषिकयोरपि बाह्यमतनिराकरणपूर्वकं षोडशपदार्थी, षट्पदार्थीनिरूपणेन वैदिकात्मनि मनोनिवेशने परमभिनिवेशः। पूर्वमीमांसायाश्च द्वादशलक्षण्याः कर्मानुष्ठानेन मनश्शुद्धिद्वारा विविदिषायामुपयोगः। सङ्कर्षणकाण्डस्याऽपि देवतानिरूपणेन तदुपासने विनियोगः। सांख्यस्याप्युदासीनात्मनि निरूपिते सुखमवतरिष्यत्यद्वितीयात्मनि मन इति परमाभिसन्धिः। योगस्य तु चित्तैकाग्रतायामेव कटाक्षः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अन्ततश्चतुष्षष्टिकलानामपि यथासम्भवमद्वितीयात्मप्रतिपत्तावुपयोगः द्रष्टव्यः। किंचोपासनाकाण्डस्याऽपि मन्दानुग्रहेण तृतीये साधनानि निर्णीतानि। तुरीये फलस्वरूपमौपनिषदात्मप्रतिपादका ये भाषाप्रबन्धास्तेऽपि समानन्यायाः। शैववैष्णवहैरण्यगर्भभट्टभास्करमतान्यपि अद्वितीयात्मप्रतिपत्त्यनुगुणान्येव मुक्तिं साधयन्ति। तत्रापि भट्टभास्करहैरण्यगर्भाभ्यां वैष्णवद्वयं, तस्माच्च शैवं प्रत्यासन्नमद्वैतस्य। तस्मात्सर्वाण्यपि विद्यास्थानानि निरस्तसमस्तभेदनिष्प्रपञ्चाखण्डसच्चिदानन्दब्रह्मात्मताप्रतिपत्तौ परम्परयोपयुज्यन्ते, साक्षात्त्वद्वैतशास्त्रमिति सिद्धम्।

॥ ओं गुरुभ्यो नमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ वेदान्तिमतं निरूप्यते ॥

वेदान्तशास्त्रस्य ब्रह्मात्मैक्यं विषयः। तदेव प्रयोजनम्। न च "ब्रह्मात्मैक्यलक्षणविषयप्रयोजनयोरसम्भवः, जीवब्रह्मभेदस्य प्रत्यक्षसिद्धत्वादि"ति वाच्यम्, जीवब्रह्मभेदस्याऽविद्याप्रयुक्तत्वेन पारमार्थिकजीवब्रह्माभेदाविरोधित्वात्। न च — अविद्याप्रयुक्तत्वमसिद्धम्, अविद्यासद्भावे मानाभावादिति — वाच्यम्। "अहमज्ञः", "त्वदुक्तमर्थं न जानामि" इति प्रतीतेरेव प्रमाणत्वात्। न च — ज्ञानाभाव एव प्रतीतेर्विषय इति वाच्यम्। लाघवेन भावाऽज्ञानस्यैव विषयत्वात्, आत्ममनस्संयोगाद्यसम्भवेन ज्ञानाभावग्रहस्यासम्भवाच्च। अविद्यालक्षणमपि सदसद्विलक्षणत्वम्। एवं च लक्षणप्रमाणाभ्यां अविद्यासिद्धौ तत्प्रयुक्तभोक्तृत्वकर्तृत्वादिसकलव्यवहारस्सर्वशास्त्रप्रवृत्तिश्च उपपद्यत इति एतदर्थप्रतिपादनायाऽस्य वेदान्तशास्त्रस्याऽऽदिमं सूत्रम्। तस्य चाऽयमर्थः— साधनचतुष्टयसम्पत्त्यनन्तरं साधनचतुष्टयसंपत्तेर्वृत्तत्वाद्धेतोः ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इति।

अत्राऽन्तःकरणावच्छिन्नः, तत्प्रतिबिम्बो वा जीवः। अविद्यावच्छिन्नः, तत्प्रतिबिम्बो वा ईश्वरः। तत्र कर्तृत्वभोक्तृत्वकिञ्चिज्ज्ञत्वादिविशिष्टो जीवः। सत्यकामत्वसत्यसङ्कल्पत्वसर्वज्ञत्वादिविशिष्ट ईश्वरः। उभयातिरिक्तं शुद्धचैतन्यं जिज्ञास्यमिति विवेकः। अविद्या तु द्विविधा मूलाऽविद्या, तूलाऽविद्या च। साऽपि पुनर्द्विविधा — आवरणशक्तिमती, विक्षेपशक्तिमती चेति।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदधिष्ठानं चिन्मात्रम् । तत्राऽऽवरणशक्तिमती मूलाऽविद्या ब्रह्मस्वरूपमावृणोति । विक्षेपशक्तिमती मूलाऽविद्या कर्तृत्वादिसंसारभ्रान्तिं जनयति । आवरणशक्तिमती तूलाऽविद्या तु शुक्त्याद्यवच्छिन्नचैतन्यस्वरूपमावृणोति । विक्षेपशक्तिमती तूलाऽविद्या तु तदवच्छिन्नचैतन्ये रजतादिभ्रमं जनयतीति विवेकः ।

अविद्यानिवृत्तिश्च वृत्तिज्ञानेन, तच्च वृत्तिज्ञानं द्विविधम् — अपरोक्षं परोक्षं चेति । तत्राऽपरोक्षं प्रमातृप्रमाणप्रमेयावच्छिन्नचैतन्यैक्यापादकम् । तदन्यत्परोक्षम् ; तथाहि — अधीतसाङ्गस्वाध्यायजनितापातब्रह्मात्मैक्यज्ञानादिमानधिकारितेनाधिकारिणा प्रथमं वेदान्तश्रवणं कर्तव्यम्, तदनन्तरं युक्तिभिरनुचिन्तनात्मकं मननम्, तदनु विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणरूपं निदिध्यासनं, तेन निदिध्यासनेन सत्यज्ञानानन्दब्रह्मात्मैक्यविषयकाप्रतिबन्धापरोक्षसाक्षात्काररूपाखण्डाकारवृत्तिज्ञानमुत्पद्यते । तेन सविलासाऽविद्यानिवृत्तौ सत्यज्ञानानन्दात्मना स्वस्वरूपेणाऽवस्थानलक्षणमोक्षरूपपुरुषार्थसिद्धिः फलम् । तूलाऽविद्यानिवृत्तिस्तु इन्द्रियार्थसन्निकर्षद्वाराऽन्तःकरणं बहिर्निर्गत्य घटाद्याकारेण परिणमते । तेन परिणामेन प्रमेयावच्छिन्नचैतन्यावारकाऽज्ञाननिवृत्तिः ।

नन्व"त्राऽथशब्दस्याऽध्ययनानन्तर्यार्थकत्वमस्तु, पूर्वतन्त्राऽऽद्यसूत्रस्थाऽथशब्दस्य तथा दृष्टत्वात्" इति चेन्न, अधिकारिफलादिभेदेन तदानन्तर्यानुपपत्तेः । ब्रह्मजिज्ञासेत्यत्र ब्रह्मणो जिज्ञासेति कर्मणि षष्ठी । जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः जिज्ञास्यान्तराऽनिर्देशाच्च । ननु ब्रह्म

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रसिद्धमप्रसिद्धं वा स्यात्? यदि प्रसिद्धं, न जिज्ञासितव्यम्। अथाऽप्रसिद्धं, नैव शक्यं जिज्ञासितुमिति। अत्रोच्यते — अस्ति तावद्ब्रह्म, नित्यशुद्धबुद्धमुक्तस्वभावं, सर्वज्ञं, सर्वशक्तिसमन्वितं। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धबुद्धत्वादयोऽर्थाः प्रतीयन्ते। बृहतेर्धातोरर्थाऽनुगमात्, सर्वस्याऽऽत्मत्वाच्च, ब्रह्मास्तित्वप्रसिद्धिः। सर्वो हि लोकोऽहमस्मीत्यात्माऽस्तित्वं प्रत्येति, न नाऽहमस्मीति। आत्मा च ब्रह्म। नन्वेवं ब्रह्माऽऽत्मत्वेन प्रसिद्धं स्याज्जिज्ञासितव्यं न स्यात् इति चेन्न, ब्रह्मस्वरूपविशेषे विप्रतिपत्तेः। तथाहि—देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च मन्यन्ते। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन एवात्मेत्यन्ये। विज्ञानमात्रं क्षणिकमात्मेत्येके। शून्यमित्यपरे। देहादिव्यतिरिक्तः कर्ता भोक्तेति नैयायिकादयः। भोक्तैव, न कर्तेति साङ्ख्याः। अस्त्येतद्व्यतिरिक्त ईश्वरस्सर्वज्ञस्सर्वशक्तिरिति केचित्। एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयास्सन्तः वेदान्तविचाराभावे मोक्षं न प्रतिपद्येरन्। अतो ब्रह्म तर्कसहितवेदान्तवाक्यैर्जिज्ञासितव्यमिति युक्तम्।

"ननु ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं ब्रह्मेत्याशङ्कायां द्वितीयसूत्रेण जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमित्युक्तं, तदनुपपन्नम्। ब्रह्मणः नानाविधप्रपञ्चहेतुत्वं न सम्भवति, तत्कारणीभूतज्ञानेच्छाकृतीनामसम्भवादि"ति चेन्न। सर्गादौ प्राण्यदृष्टवशाच्चिकीर्षादिकार्यनिर्वाहकमायावृत्यभ्युपगमात्। "ननु एतन्मते ब्रह्मणः जगत्कारणत्वं नाम जगदुपादानत्वं वक्तव्यं, तच्च न सम्भवति। समवायघटितत्वादुपादानत्वस्येति" चेन्न।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यदभिन्नं कार्यमुत्पद्यते तत्कारणं उपादानमित्युपादानलक्षणाङ्गीकारात् । अभेदश्च पृथक्सत्ताशून्यत्वम् । तच्च, अविद्याब्रह्मणोः साधारणम् । तत्राऽविद्यापरिणाम्युपादानं ब्रह्म विवर्तोपादानम् । स्वरूपपरित्यागेन रूपान्तरभावः परिणामः । स्वरूपाऽपरित्यागेन रूपान्तरभावो विवर्तः । नन्वेवं ब्रह्मण उपादानत्वसम्भवेऽपि जगत्कारणत्वरूपलक्षणस्य मायाशबलनिष्ठतया जिज्ञास्यशुद्धब्रह्मनिष्ठत्वाभावात् व्यर्थम् । न च शबलब्रह्मनिष्ठमेव तटस्थतया शुद्धस्योपलक्षणम्; शाखाग्रमिव चन्द्रस्य । स्वरूपलक्षणन्तु आनन्दादयः प्रधानस्येत्यधिकरणे शुद्धब्रह्मप्रतिपत्तिपरेषु सर्वेषु वाक्येषु उपसंहरणीयत्वेन वर्णयिष्यमाणं सत्यज्ञानानन्दस्वरूपमिति वाच्यम् । तर्हि आवश्यकेनैव स्वरूपलक्षणेन सर्वतो व्यावृत्तब्रह्मप्रतिपत्तिस्सम्भवतीति तटस्थलक्षणवैयर्थ्यात् । चन्द्रस्य तु तटस्थलक्षणमुक्तेऽपि स्वरूपलक्षणे चन्द्रदिदृक्षया चन्द्रबुभुत्सोर्गगने सर्वतश्चक्षुर्विक्षेपक्लेशस्स्यात् । स माऽभूदिति देशविशेषेषु चक्षुर्नियमनायोपपद्यत इति चेन्न, लक्ष्यपरब्रह्मशब्दार्थतया प्राप्तस्य निष्प्रपञ्चत्वस्य, यद्रजतमभूत् सा शुक्तिरितिवत् अध्यारोपापवादन्यायेन सिद्ध्यर्थं तटस्थलक्षणम् । स्वरूपलक्षणन्तु स्वरूपविशेषतिप्रतिपत्त्यर्थमिति न कस्यापि वैयर्थ्यम् । तस्मादस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं, यतस्सर्वज्ञात् सर्वशक्तेः कारणादिति सुष्ठूक्तम् ।

अत्र प्रधानपरमाणूपादानत्ववादा ईक्षणपूर्वकोपादानत्वप्रतिपादकश्रुत्या निरस्ताः । अत्रायमुत्पत्तिक्रमः — प्रथमं पञ्चतन्मात्राणामुत्पत्तिः, ततः पञ्चीकरणप्रक्रिययाऽऽकाशादिपञ्चमहाभूतानामुत्पत्तिः, तत ओषध्युत्पत्तिः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदनन्तरमन्नोत्पत्तिः, तदनन्तरं पुरुषाद्युत्पत्तिरिति । जाग्रत्स्वप्नसुषुप्त्यभिमानिनो विश्वतैजसप्राज्ञाः । एतल्लयो विपर्ययेण ।

ननु जगज्जन्मादिकारणत्वेन ब्रह्मणः सर्वज्ञत्वं यदुक्तं तदनुपपन्नम्, वेदादौ ब्रह्मणः कर्तृत्वे वेदस्य पौरुषेयत्वापत्तेरिति चेन्न, वेदकर्तृत्वमिह नार्थमुपलभ्य रचयितृत्वम् । येन सापेक्षत्वलक्षणं पौरुषेयत्वं स्यात् । किन्तु अध्येतॄणां फलसिद्धये पूर्वपूर्वकल्पक्रमादिविशिष्टवर्णोच्चारयितृत्वं वेदकर्तृत्वम् । एवं चातीतानागतसकलवेदक्रमादिसन्धानं वर्णपदवाक्यप्रतिसन्धानं च ब्रह्मणो वक्तव्यम् । तदभावे वेदकर्तृत्वायोगात् । तत्प्रतिसन्धानं च न मानान्तरात्, तस्यान्तःकरणाद्यभावेन प्रसिद्धमानाऽप्रवृत्तेः । किन्तु अनावृतस्वरूपचैतन्यबलादिति सङ्कोचकाभावात्, यावत्स्वसंसृष्टप्रकाशरूपसर्वज्ञं ब्रह्म सिद्ध्यति । एवमेवेश्वरसर्वज्ञत्वं परैरप्यङ्गीकर्तव्यम् । प्रकारान्तरेण सर्वज्ञत्वासिद्धेः । अत एव वेदाप्रतिपाद्यनदीवालुकादिज्ञानाभावान्न, सर्वज्ञं ब्रह्मेत्यपास्तम् । स्वसंसर्गितया तदर्थप्रकाशत्वरूपसर्वज्ञत्वसम्भवात् । अथवा, यथोक्तऋग्वेदादिशास्त्रं योनिः प्रमाणं यस्य ब्रह्मणः, तत्त्वात्तत्प्रमाणकत्वादित्यर्थः ।

नन्विदमनुपपन्नम् । वेदवाक्यानां क्रियापरत्वेन सिद्धब्रह्मपरत्वासम्भवात्, प्रवृत्तिनिवृत्त्यन्यतरजनकस्यैव प्रमाणत्वात् । अत एव पूर्वतन्त्रे अर्थवादानां विधिशेषत्वमङ्गीकृतम् । एवं च वेदान्तानामपि कर्मापेक्षितशरीरव्यतिरिक्तकर्तृपरत्वमेव । न जिज्ञास्यब्रह्मपरत्वं, उपासनाविधिशेषत्वं वेति न शास्त्रयोनित्वं ब्रह्मण इति चेदत्रोच्यते— वेदान्तानामुपक्रमोपसंहारादिना शुद्धब्रह्मपरत्वावसायात्, लोके "सरसमाम्रफलं," "पुत्रस्ते जात" इति सिद्धार्थानामपि प्रमाणत्वात् । न

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

च, कर्मापेक्षितकर्तृसमर्पकत्वेन वेदान्तानां प्रामाण्यमुक्तमिति वाच्यम् । कर्तृत्वभोक्तृत्वविरुद्धनिर्गुणब्रह्मप्रतिपादकवाक्यानां कर्मापेक्षितकर्तृपरत्वा-योगात् । प्रत्युत, कर्मबोधकवाक्यानामेव परम्परया, शुद्धसिद्धब्रह्म-प्रतिपत्तावुपयोगसम्भात् । तथाहि—नित्यनैमित्तिककर्मणां सर्वेषां चित्त-शुद्धावुपयोगः । काम्यकर्मणामपि कर्मजन्यफलस्याऽनित्यत्वदर्शनेन निष्कामनयाऽनुष्ठानस्य चित्तशुद्धावेवोपयोगात्, उपासनाकाण्डस्यापि स्थूलारुन्धतीन्यायेन शुद्धब्रह्मप्रतिपत्तावेवोपयोगात् । अयमत्र वेदान्त-तत्त्वनिर्णयसङ्ग्रहः—प्रथमाध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वय-प्रतिपादनम् । द्वितीयाध्याये न्यायवैशेषिकसाङ्ख्ययोगविरोधनिराकरणम् । तृतीयाध्याये साधनीभूतसगुणोपासनादिषु गुणोपसंहारतदभावज्ञानस्यैव मोक्षसाधनत्वादिनिरूपणम् । चतुर्थाध्याये क्रममुक्तिजीवन्मुक्त्यादिनिरूपणम् । अर्चिरादितन्मार्गनिरूपणं चेति । इत्थं सर्वेषां तन्त्राणां, अपि वात्स्याय-नादीनां ब्रह्मण्येव समन्वय इति साक्षात्परम्परया वा ब्रह्मावगता वुपयोग इति वेदितव्यम् ।

॥ इति वेदान्तमतं समाप्तम् ॥

॥ श्रीसरस्वत्यै नमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ व्याकरणमतं विलिख्यते ॥

शिलायामपि चैतन्यसृजे कौशिकहर्षिणे ।
कुलदेवाय गुरवेऽप्यस्तु धर्मभृते नमः ॥

व्याकरणशास्त्रस्य शब्दा विषयाः । ते च शब्दा द्विविधाः— वैदिका लौकिकाश्च । तत्र वैदिका वेदेषु प्रयुक्ताश्शब्दाः । वेदाश्च ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेद इति चतुर्विधाः । लौकिकाश्च लोके प्रयुक्ताश्शब्दाः । लोकशब्देन च ये विवक्षितास्ते प्रदर्श्यन्ते । अष्टादशस्मृतयः, उपस्मृतयः, शीक्षा, कल्पसूत्राणि षट्, व्याकरणानि नव, तत्तद्वेदानां प्रातिशाख्यानि, यज्ञप्रयोगफलानि श्रौतवाक्यानि, वैदिकशब्दनिर्वचनफलानि निरुक्तानि, लौकिकवैदिकच्छन्दो-विशेषप्रतिपादकच्छन्दोविचितिग्रन्थः, ज्योतिश्शास्त्रग्रन्थाः, अष्टादश पुराणानि, उपपुराणानि च, न्यायशास्त्र, वैशेषिकशास्त्र, पूर्वमीमांसाशास्त्रोत्तरमीमांसाशास्त्र, साङ्ख्यशास्त्र, योगशास्त्राणि इति षट् शास्त्राणि, आयुर्वेद, धनुर्वेद गान्धर्वशास्त्र भरतशास्त्राणि च, मन्त्रशास्त्र तान्त्रिकशास्त्र शिल्पशास्त्र वात्स्यायनादिशास्त्राणि च महाभारतादीतिहासग्रन्थाः, रामायणादीनि काव्यानि, कविकल्पितानि नाटकादीनि, दशरूपकाणि, बृहत्कथाकादम्बरीप्रभृतयः आख्यायिकाः, अलङ्कारशास्त्राणि, एतेषु प्रयुक्ताश्शब्दाः महाभाष्ये एकशतमध्वर्युशाखाः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सहस्रं सामशाखाः इत्यादिना ग्रन्थेन व्याकरणशास्त्रस्य विषयत्वेन दर्शिताः ।

तत्र वैदिकशब्देषु रक्षा व्याकरणशास्त्रस्य प्रयोजनम् । तेन हि उपाध्यायेनाऽध्याप्यमाणेषु वैदिकशब्देषु अक्षरभ्रंशादौ सम्भाविते़ऽपि "एवमनेनाक्षरेण भवितव्यं, व्याकरणेनाऽस्य शब्दस्य एवं निरूपितत्वादि"ति ज्ञातुं शक्यते । किंच श्रुतिप्रोक्तकर्म-प्रकृतावाम्नातस्य विकृतावतिदेशे "अग्नय"—इतीकारान्तचतुर्थ्यन्तदेवता-पदस्थाने अकारान्त"सूर्य"शब्दस्य चतुर्थ्यन्तस्य कथं प्रयोग इति संशये व्याकरणशास्त्रानुसारेण 'सूर्याये'ति प्रयोक्तव्यमिति निश्चेतुं शक्यते । एवं बहूनि प्रयोजनानि महाभाष्ये दर्शितानि । तत्र रक्षारूपं प्रयोजनं वैदिकशब्देषूक्तमपि स्मृत्यादिशब्दसाधारणमिति तत्रापि योजनीयम् । लौकिकशब्देषु तु "साधुशब्दा एव प्रयोक्तव्या" - इति नियमश्रुत्या दर्शिताऽसाधुशब्दानां शब्दानृतरूपत्वेन शब्दानृतरूपानृतभाषणस्य श्रुत्या निषेधात् । महाभाष्ये तु अपशब्दप्रयोगो न कर्तव्य इत्येवंरूपार्थकं श्रुत्यन्तरं दर्शितम् । लक्षणज्ञानपूर्वकसुशब्दप्रयोगे प्रयोक्तुः स्वर्गरूपफलं च दर्शितम् । तथा "'कमु कान्तावि'ति धातौ लुङि'अचीकमत,' 'अचकमत' इति रूपद्वये अचीकमतेति प्रयुञ्जानाः पादसञ्चारेण स्वर्गं गच्छन्ति, अचकमतेति विशेषप्रक्रियाज्ञानपूर्वकं प्रयोगे वडवायुक्तरथैस्स्वर्गं गच्छन्ति" इति शब्दप्रयोगविशेषेण स्वर्गविशेषः फलमिति दर्शितम् । तत्र स्वबुद्धिगतस्याऽर्थस्य परेण ज्ञातुमशक्यत्वात् स्ववाग्व्यापारेण परं प्रति बोधार्थं शब्दप्रयोगे प्राप्ते 'साधव एव शब्दाः प्रयोक्तव्याः नाऽसाधव' इति निगम उपपद्यते। ततश्च साधुशब्दप्रयोगे धर्मः, असाधुशब्दप्रयोगे

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रत्यवाय इति सिद्धम्। यथा क्षुत्प्रतिघातार्थं भोक्तुं विहितस्य निषिद्धस्य च सन्निधौ विहितभोजने धर्मः, प्रतिषिद्धभोजने प्रत्यवाय इति धर्मशास्त्रे। एवं च व्याकरणानुशिष्टानां साधुशब्दत्वं, नाऽन्येषामिति सिद्ध्यति।

अत्र काव्येषु अपशब्दप्रयोगः काव्यदोषत्वेन काव्यप्रकाशादौ अलंकारशास्त्रे दर्शित इति लोकेऽपशब्दप्रयोगोऽत्यन्तं प्रत्यवायहेतुर्भवतीति केचिदाहुः। महाभाष्ये तु 'यर्वाणस्तर्वाण' इत्यादिना यज्ञे कर्मणि प्रत्यवाय-हेतुत्वादपशब्दप्रयोगोऽत्यन्तं प्रतिषिद्धः। तत्र प्रयोगः प्रदर्श्यते — गोकर्मकाऽऽनयनक्रियाकसंसर्गे विवक्षिते "देवदत्त, त्वया गौरानीयतां, देवदत्त, त्वं गामानय" इति च सुशब्दप्रयोगः। कर्मणि लकारं विधाय कर्तृपदे तृतीयां च विधाय कर्मद्वितीयायामभिहितत्वादप्राप्तायां शास्त्रेण प्रथमा विहितेति साधुशब्दप्रयोगः। तथा कर्तरि लकारं विधाय कर्मणि अनभिहितत्वात् द्वितीयां विधाय "कर्तरि प्रथमा" शास्त्रेण विहितेति सुशब्दप्रयोगः। तद्विपरीततया, त्वया "गामानीयतां, त्वं गौरानीयतामि"त्यप-शब्दप्रयोगः। तथा, "त्वं गौरानय, त्वया गामानीयतां" इत्यपशब्द-प्रयोगः। तथा' तिङ् समानाधिकरणभवच्छब्दप्रयोगे प्रथमपुरुषः, तादृश-युष्मच्छब्दप्रयोगे मध्यमपुरुषः शास्त्रेण विहित इति। "भवान् गामानयतु, त्वं गामानये"ति सुशब्दप्रयोगः। भवान् गामानय, त्वं गामानयतु इत्यपशब्द-प्रयोगः। तथा गामानयेति प्रयोक्तव्ये गवीमानयेत्यपशब्दप्रयोगः। 'अश्वमा-नये'ति प्रयोक्तव्येऽस्वमानयेत्यपशब्दप्रयोगः इत्याद्यूह्यम्। सुशब्दप्रयोगेण वाऽपशब्दप्रयोगेणाप्यर्थबोधः। यथा — "गम्यागमनेनेवागम्यागमनेनापि' सौख्यप्राप्ति"रिति महाभाष्ये स्थितम्। तथा च सुशब्दस्येवाऽपशब्दस्यापि वाचकत्वमाहुः। व्याकरणानुशिष्टत्वं साधुत्वं न तु वाचकत्वं साधुत्वमिति च।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ते च शब्दाश्चतुर्विधाः – जातिशब्दाः गुणशब्दाः, क्रियाशब्दाः, संज्ञाशब्दाश्चेति । जातिशब्दाः घटपटब्राह्मणक्षत्रियादयः । गुणशब्दाः पटुगुरुशुक्लगौरादयः । क्रियाशब्दाः याचकपाचकादयः, पचति पठतीत्यादयश्च । एते जातिशब्दा वा संज्ञाशब्दाः डित्थडवित्थादयः । संज्ञाशब्दा आपि जातिशब्देष्वन्तर्भवन्ति । बाल्याद्यवस्थाकानेकव्यक्तिनिष्ठत्वाज्जातित्वाभ्युपगमादिति वार्तिककारमतमाहुः । यद्यपि सूत्रकारेण पाणिनिना शास्त्रस्य विषयप्रयोजने न दर्शिते, वार्तिककारेण च वररुचिनाम्ना कात्यायनेन साधूनेव प्रयुञ्जीतेति नियमः, रक्षोहादिकमपि प्रयोजनमुक्तम् । तथापि भाष्यकारेण भगवता पतञ्जलिना शब्दा विषयाः, सुशब्दप्रयोगे स्वर्गः फलं, अपशब्दप्रयोगे प्रत्यावाय इति दर्शितत्वात् तथैवात्राऽपि दर्शितम् । त्रयोऽपि मुनयो मिलित्वा शास्त्रं कृतवन्त इति एकेनानुक्तमपि, अन्येनोक्तं प्रमाणमेव । अत एव त्रिमुनिव्याकरणमिति प्रसिद्धिः । पाणिनेस्सूत्रकारस्य भाष्यकारेण कण्ठरवेण प्रामाण्यमुक्त्वा तदुक्तसूत्रेषु आनर्थक्यशङ्का न कर्तव्येत्युक्तम् । अभियुक्तैः पुनः सूत्रकारापेक्षया वार्तिककारः, प्रमाणतरः, अधिकलक्ष्यप्रदर्शितत्वात्, ततोऽपि भाष्यकारः प्रमाणतम इत्युक्तम् । तत्रार्थबोधनार्थं वाक्यस्य प्रयोगात्, वाक्यसंस्कारश्शास्त्रे क्रियते, "न पदान्त"सूत्रे पदान्तग्रहणं चेह ज्ञापकमिति वदन्ति । भाष्यकारस्तु संस्कृत्य पदान्युत्सृज्यन्त इति पदसंस्कारमुक्तवान् । संस्कारो नाम प्रकृतिप्रत्ययविभागादिना निरूपणम् । पदकदम्बकात्मकत्वाद्वाक्यस्य पदेषु संस्क्रियमाणेषु वक्यसंस्कारो भवतीति वाक्यसंस्कारपक्षोप्यङ्गीक्रियते । प्रकृतिप्रत्ययनिरूपणद्वारा शब्दा अन्वाख्यायन्ते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्र प्रकृतिश्चतुर्धा – धातुरूपा, प्रातिपदिकरूपा सुबन्तरूपा, तिङन्तरूपा च। अष्टाध्यायात्मके व्याकरणे तृतीयाध्याये धातुरूपप्रकृतेः परप्रत्यया विधीयन्ते। क्वचित्सुबन्तात्प्रातिपदिकाच्च प्रत्ययविधिरस्ति। एकैकस्याऽध्यायस्य पादचतुष्टयात्मत्वात्। चतुर्थाध्यायस्य प्रथमपादे प्रातिपदिकरूपायाः प्रकृतेः परत्वेन सुप्प्रत्ययास्स्त्रीप्रत्ययाश्च विधीयन्ते। तत-उपरि तद्धितप्रत्ययाः। पञ्चमाध्यायपरिसमाप्तिपर्यन्तं सुबन्तप्रकृतेर्विधीयन्ते, तिङन्तप्रकृतेश्च केचित्प्रत्ययाः पञ्चमाध्यायमध्ये विधीयन्ते। एवं च तृतीयचतुर्थपञ्चमाध्यायैः प्राधान्येन प्रत्यया विधीयन्ते। तत्र तत्राऽऽनुषङ्गिकाः आदेशा आगमाश्च विधीयन्ते। एषामुदाहरणानि प्रदर्श्यन्ते।

धातुरूपा प्रकृतिर्द्विविधा – गणपठिता, प्रत्ययान्ता च। गणपठिता यथा -- भवति, भवतः, भवन्ति। भ्वादिगणः। शब्विकरणः। अत्ति, अत्तः, अदन्ति। अदादिः, लुग्विकरणः। अद भक्षणे। जुहोति, जुहुतः, जुह्वति। जुहोत्यादिः श्लुविकरणः। हु दानादनयोः। दीव्यति, दीव्यतः दीव्यन्ति। दिवादिः श्यन् विकरणः। दिवु-क्रीडाविजिगीषादौ। सुनोति सुनुतः सुन्वन्ति। स्वादिः श्नुविकरणः। षूञ् - अभिषवे। तुदति तुदतः तुदन्ति। तुदादिः शविकरणः। तुद-व्यथने। रुणद्धि रुन्धः रुन्धन्ति। रुधादिः श्नं विकरणः। रुधिर्-आवरणे। तनोति तनुतः तन्वन्ति। तनादिः उविकरणः। तनु-विस्तारे। क्रीणाति क्रीणीतः क्रीणन्ति। क्र्यादिः - श्नाविकरणः। डुक्रीञ् द्रव्यविनिमये। अथ प्रत्ययान्तधातुप्रकृतिः – चोरयति, चोरयतः, चोरयन्ति। चुरादिः स्वार्थे ण्यन्तः। चुर-स्तेये।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जुगुप्सते, जुगुप्सेते, जुगुप्सन्ते। स्वार्थे सन्नन्तः। गुप कोपनकुत्सनयोः। कर्तुमिच्छति चिकीर्षति चिकीर्षतः चिकीर्षन्ति। इच्छासन्नन्तः। डुकृञ् करणे। पुत्रमात्मन इच्छति पुत्रीयति। क्यजन्तः। पुत्रकाम्यति। काम्यजन्तः। राजेवाऽऽचरति राजायते। क्यङन्तः। लोहितो भवति लोहितायति। क्यषन्तः। वृक्षइवाऽऽचरति वृक्षति। क्विबन्तः। कामयतेः णिङन्तः। कमु कान्तौ। पुच्छमुदस्यति उत्पुच्छयते। णिङन्तः। ऋतीयते। ईयङन्तः- घृणार्थकः। ऋतिधातुः। कण्डूयति यङन्तः। कण्डूञ्गात्रविकर्षणे। पुनःपुनः भवति बोभूयते। भू-सत्तायाम्। भवन्तं प्रेरयति भावयति। क्षीणन्तं प्रेरयति क्षापयति। चोरयन्तं प्रेरयति चोरयति। जुगुप्समानं प्रेरयति जुगुप्सयति। बोभूयमानं प्रेरयति बोभूयतीत्याद्यूह्यम्। एते हेतुमण्ण्यन्ताः।

सर्वेभ्यो धातुभ्यः हेतुमण्णिच् भवति। प्रयोजकव्यापारो हेतुमानित्युच्यते। सर्वेभ्यो धातुभ्यः इच्छा सन् भवति। पुत्रीयितुमिच्छति पुत्रीयिषति। बोभूयिषितुमिच्छति बोभूयिषते इत्यादि। यङ्लुकि तु बोभवीति बोभोति, बोभूतः, बोभुवन्तीत्यादि।

प्रातिपदिकरूपा प्रकृतिश्चतुर्विधा – केवलप्रातिपदिक, कृदन्त-प्रातिपदिक, तद्धितान्तप्रातिपदिक, समासप्रातिपदिकभेदात्। केवल-प्रातिपदिका"त्सु"प्रत्ययो यथा – रामः, रामौ, रामाः। कृदन्तपातिपदि-काद्यथा – पाचकः, पाचकौ, पाचकाः। तद्धितान्तप्रातिपदिकाद्यथा – दाशरथिः, दाशरथी, दाशरथयः। समासप्रातिपदिकाद्यथा राजपुरुषः, राजपुरुषौ, राजपुरुषाः स्त्रीप्रत्यया अष्टौ। टाप्, डाप्, चाप्,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ङीप्, ङीष्, ङीन्, ऊङ्, तिश्च इति भेदात्। स्त्रीप्रत्ययान्तानां प्रातिपदिककार्यभाक्त्वमस्तीति ततस्सुप्रत्ययाः। क्रमेणोदाहरणानि — रमा, बहुराजा बहुराजे, कौसल्या, (चाप्) नदतीति नदी, कुरुषु चरतीति कुरुचरी, (ङीप्) नर्तकी, गौरी (ङीष्) नारी, ब्राह्मणी, (ङीन्) रम्भोरूः (ऊङ्) युवतिः (तिः)

सुबन्तप्रकृतेस्तद्धितोत्पत्तिर्यथा — दशरथस्यापत्यं दाशरथिः। अपत्यार्थे इञि सति षष्ठ्या लुक्। प्राह्णे भवः प्राह्णेतनः इत्यत्र ट्युप्रत्यये सप्तम्या लुङ् न भवति। क्वचित्तद्धितस्सुबन्तात् पूर्वो भवति — ईषदूनाः पटवः बहुपटव इति। तिङन्तात्तद्धितो यथा — ईषदूनं पचति पचतिकल्पम्। अतिशयेन पचति पचतितराम् प्रशस्तं पचति पचतिरूपमिति। हन्तुं योग्यो वध्य इत्यत्र यप्रत्यये विधीयमाने, हनहिंसागत्योरित्यस्य वधादेशश्च विधीयते। एवं विश्रवसोऽपत्यं वैश्रवण इत्यत्रापत्यार्थे 'ण'प्रत्यये विधीयमाने विश्रवणादेशश्च। तथाऽत्र पुणो जतुनो वा विकारस्त्रापुषम्, जातुषम् — इत्यत्र विकारार्थे णि विधीयमाने प्रकृतेष्पुगागमः।

तृतीयचतुर्थपञ्चमेषु प्रत्यया विधीयन्त इत्युक्तमेव। प्रथमाध्याये प्रायेण संज्ञा विधीयन्ते — वृद्धिसंज्ञागुणसंज्ञादयः। परिभाषासूत्राणि च। एकशेषविधिः, आत्मनेपदपरस्मैपदनियमाश्च। क्वचित्संज्ञादिनिषेधाः। द्वितीयाध्याये तु पराङ्गवद्भावाऽव्ययीभावादि समासविधिविभक्तिनियमविधि द्वन्द्वैकवद्भावादिकार्याणि। षष्ठे तु धात्ववयवद्वित्वसंप्रसारण तन्निषेध स्वरसन्धिकार्य सुडागमोदात्तादिस्वरविधि समासाश्रयालुग्विधिपुंव-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ह्रावादिकार्यं कतिपयाङ्गाधिकारकार्याणि च विधीयन्ते। सप्तमे तु प्रत्ययादेशविशेष प्रकृत्यादेशविशेषाश्च विधीयन्ते । अष्टमे तु पदद्वित्त्व युष्मदस्मदादेशतिङन्त स्वर तन्निषेध न लोप मतुब्वत्वलत्व संयोगान्तलोपादिपदान्तकार्यविशेषनिष्ठानत्वप्लुतरुत्वाऽऽनुनासिकाऽनुस्वार विसर्जनीय सत्वषत्वणत्वश्चुत्व ष्टुत्ववर्णद्वित्ववर्णलोपादीनि कार्याणि, विवृताकारस्य संवृताकारश्च विधीयन्ते।

॥ इति व्याकरणमतसङ्ग्रहस्सम्पूर्णः ॥

फणिग्रामणिवाग्गुम्फप्राणनाड्यः यदुक्तयः ।
कलये शब्दकौमुद्याः कवये गुरवे नमः ॥

अपेक्षितपरित्यागेऽप्यनपेक्षितवर्णने ।
इदं सन्तो न निन्दन्तु नृणां धर्मो ननु भ्रमः ॥

श्री गुरुभ्यो नमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy